# शतकत्रयम्

Exported from ambuda.org on 2025-12-24 07:11:51 UTC

1.head

## नीति-शतकम्

1.1

दिक्कालाद्यनवच्छिन्नानन्तचिन्मात्रमूर्तये ।स्वानुभूत्येकमानाय नमः शान्ताय तेजसे ॥ १ ॥

1.2

बोद्धारो मत्सरग्रस्ताःप्रभवः स्मयदूषिताः ।अबोधोपहताः चान्येजीर्णम् अङ्गे सुभाषितम् ॥ २ ॥

1.3

अज्ञः सुखम् आराध्यःसुखतरम् आराध्यते विशेषज्ञः ।ज्ञानलवदुर्विदग्धंब्रह्मापि तं नरं न रञ्जयति ॥ ३ ॥

1.4

प्रसह्य मणिम् उद्धरेन् मकरवक्त्रदंष्ट्रान्तरात्समुद्रम् अपि सन्तरेत् प्रचलद् ऊर्मिमालाकुलम् ।भुजङ्गम् अपि कोपितं शिरसि पुष्पवद् धारयेत्न तु प्रतिनिविष्टमूर्खजनचित्तम् आराधयेत् ॥ ४ ॥

1.5

लभेत सिकतासु तैलम् अपि यत्नतः पीडयन्पिबेच् च मृगतृष्णिकासु सलिलं पिपासार्दितः ।क्वचिद् अपि पर्यटन् शशविषाणम् आसादयेत्न तु प्रतिनिविष्टमूर्खचित्तम् आराधयेत् ॥ ५ ॥

1.6

व्यालं बालमृणालतन्तुभिर् असौ रोद्धुं समुज्जृम्भतेछेत्तुं वज्रमणिं शिरीषकुसुमप्रान्तेन सन्नह्यति ।माधुर्यं मधुबिन्दुना रचयितुं क्षारामुधेर् ईहतेनेतुं वाञ्छन्ति यः खलान् पथि सतां सूक्तैः सुधास्यन्दिभिः ॥ ६ ॥

1.7

स्वायत्तम् एकान्तगुणं विधात्राविनिर्मितं छादनम् अज्ञतायाः ।विशेषाअतः सर्वविदां समाजेविभूषणं मौनम् अपण्डितानाम् ॥ ७ ॥

1.8

यदा किञ्चिज्-ज्ञो ऽहं द्विप इव मदान्धः समभवं

तदा सर्वज्ञो ऽस्मीत्य् अभवद् अवलिप्तं मम मनःयदा किञ्चित् किञ्चिद् बुधजनसकाशाद् अवगतंतदा मूर्खो ऽस्मीति ज्वर इव मदो मे व्यपगतः ॥ ८ ॥

1.9

कृमिकुलचित्तं लालाक्लिन्नं विगन्धिजुगुप्सितंनिरुपमरसं प्रीत्या खादन् नरास्थि निरामिषम् ।सुरपतिम् अपि श्वा पार्श्वस्थं विलोक्य न शङ्कतेन हि गणयति क्षुद्रो जन्तुः परिग्रहफल्गुताम् ॥ ९ ॥

1.10

शिरः शार्वं स्वर्गात् पशुपतिशिरस्तः क्षितिधरंम्हीध्राद् उत्तुङ्गाद् अवनिम् अवनेश् चापि जलधिम् ।अधो ऽधो गङ्गेयं पदम् उपगता स्तोकम्अथवाविवेकभ्रष्टानां भवति विनिपातः शतमुखः ॥ १० ॥

1.11

शक्यो वारयितुं जलेन हुतभुक् च्छत्रेण सूर्यातपोनागेन्द्रो निशिताग्कुशेन समदो दण्डेन गोगर्दभौ ।व्याधिर् भेषजसङ्ग्रहैश् च विविधैर् मन्त्रप्रयोगैर् विषंसर्वस्यौषधम् अस्ति शास्त्रविहितं मूर्खस्य नस्त्य् औषधिम् ॥ ११ ॥

1.12

साहित्यसङ्गीतकलाविहीनःसाक्षात् पशुः पुच्छविषाणहीनः ।तृणं न खादन्न् अपि जीवमानस्तद् भागधेयं परमं पशूनाम् ॥ १२ ॥

1.13

येषां न विद्या न तपो न दानंज्ञानं न शीलं न गुणो न धर्मः ।ते मर्त्यलोके भुवि भारभूतामनुष्यरूपेण मृगाश् चरन्ति ॥ १३ ॥

1.14

वरं पर्वत-दुर्गेषु

भ्रान्तं वनचरैः सहन मूर्खजनसम्पर्कःसुरेन्द्रभवनेष्व् अपि ॥ १४ ॥

1.15

शास्त्रोपस्कृतशब्दसुन्दरगिरः शिष्यप्रदेयागमाविख्याताः कवयो वसन्ति विषये यस्य प्रभोर् निर्धनाः ।तज्जाड्यं वसुधादिपस्य कवयस् त्व् अर्थं विनापीश्वराःकुत्स्याः स्युः कुपरीक्षका हि मणयो यैर् अर्घतः पातिताः ॥ १५ ॥

1.16

हर्तुर् याति न गोचरं किम् अपि शं पुष्णाति यत् सर्वदा ऽप्य्अर्थिभ्यः प्रतिपाद्यमानम् अनिशं प्राप्नोति वृद्धिं पराम् ।कल्पान्तेष्व् अपि न प्रयाति निधनं विद्याख्यम् अन्तर्धनंयेषां तान् प्रति मानम् उज्झत नृपाः कस् तैः सह स्पर्धते ॥ १६ ॥

1.17

अधिगतपरमार्थान् पण्डितान् मावमंस्थास्तृणम् इव लघु लक्ष्मीर् नैव तान् संरुणद्धि ।अभिनवमदलेखाश्यामगण्डस्थलानांन भवति बिसतन्तुर् वारणं वारणानाम् ॥ १७ ॥

1.18

अम्भोजिनीवनविहारविलासम् एवहंसस्य हन्ति नितरां कुपितो विधाता ।न त्व् अस्य दुग्धजलभेदविधौ प्रसिद्धांवैदग्धीकीर्तिम् अपहर्तुम् असौ समर्थः ॥ १८ ॥

1.19

केयूराणि न भूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वलान स्नानं न विलेपनं न कुसुमं नालङ्कृता मूर्धजाः ।वाण्य् एका समलङ्करोति पुरुषं या संस्कृता धार्यतेक्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम् ॥ १९ ॥

1.20

विद्या नाम नरस्य रूपम् अधिकं प्रच्छन्नगुप्तं धनंविद्या भोगकरी यशःसुखकरी विद्या गुरूणां गुरुः ।विद्या बन्धुजनो विदेशगमने विद्या परा देवताविद्या राजसु पूज्यते न तु धनं विद्याविहीनः पशुः ॥ २० ॥

1.21

क्षान्तिश् चेत् कवचेन किं किम् अरिभिः क्रोधो ऽस्ति चेद् देहिनांज्ञातिश् चेद् अनलेन किं यदि सुहृद् दिव्यौषधं किं फलम् ।किं सर्पैर् यदि दुर्जनाः किम् उ धनैर् विद्या ऽनवद्या यदिव्रीडा चेत् किम् उ भूषणैः सुकविता यद्य् अस्ति राज्येन किम् ॥ २१ ॥

1.22

दाक्षिण्यं स्वजने दया परिजने शाठ्यं सदा दुर्जनेप्रीतिः साधुजने नयो नृपजने विद्वज्जने चार्जवम् ।शौर्यं शत्रुजने क्षमा गुरुजने कान्ताजने धृष्टताये चैवं पुरुषाः कलासु कुशलास् तेष्व् एव लोकस्थितिः ॥ २२ ॥

1.23

जाड्यं धियो हरति सिञ्चति वाचि सत्यंमानोन्नतिं दिशति पापम् अपाकरोति ।चेतः प्रसादयति दिक्षु तनोति कीर्तिंसत्सङ्गतिः कथय किं न करोति पुंसाम् ॥ २३ ॥

1.24

जयन्ति ते सुकृतिनोरससिद्धाः कवीश्वराः ।नास्ति येषां यशःकायेजरामरणजं भयम् ॥ २४ ॥

1.25

सूनुः सच्चरितः सती प्रियतमा स्वामी प्रसादोन्मुखःस्निग्धं मित्रम् अवञ्चकः परिजनो निःक्लेशलेशं मनः ।आकारो रुचिरः स्थिरश् च विभवो विद्यावदातं मुखंतुष्टे विष्टपकष्टहारिणि हरौ सम्प्राप्यते देहिना ॥ २५ ॥

1.26

प्राणाघातान् निवृत्तिः परधनहरणे संयमः सत्यवाक्यंकाले शक्त्या प्रदानं युवतिजनकथामूकभावः परेषाम् ।तृष्णास्रोतो विभङ्गो गुरुषु च विनयः सर्वभूतानुकम्पासामान्यः सर्वशास्त्रेष्व् अनुपहतविधिः श्रेयसाम् एष पन्थाः ॥ २६ ॥

1.27

प्रारभ्यते न खलु विघ्नभयेन नीचैःप्रारभ्य विघ्नविहता विरमन्ति मध्याः ।विघ्नैः पुनः पुनर् अपि प्रतिहन्यमानाःप्रारब्धम् उत्तमजना न परित्यजन्ति ॥ २७ ॥

1.28

असन्तो नाभ्यर्थ्याः सुहृद् अपि न याच्यः कृशधनःप्रिया न्याय्या वृत्तिर् मलिनम् असुभङ्गे ऽप्य् असुकरम् ।विपद्य् उच्चैः स्थेयं पदम् अनुविधेयं च महतांसतां केनोद्दिष्टं विषमम् असिधाराव्रतम् इदम् ॥ २८ ॥

1.29

क्षुत्क्षामो ऽपि जराकृशो ऽपि शिथिलप्राणो ऽपि कष्टां दशाम्आपन्नो ऽपि विपन्नदीधितिर् इति प्राणेषु नश्यत्स्व् अपि । मत्तेभेन्द्रविभिन्नकुम्भपिशितग्रासैकबद्धस्पृहःकिं जीर्णं तृणम् अत्ति मानमहताम् अग्रेसरः केसरी ॥ २९ ॥

1.30

स्वल्पस्नायुवसावशेषमलिनं निर्मांसम् अप्य् अस्थि गोःश्वा लब्ध्वा परितोषम् एति न तु तत् तस्य क्षुधाशान्तये ।सिंहो जम्बुकम् अङ्कम् आगतम् अपि त्यक्त्वा निहन्ति द्विपंसर्वः कृच्छ्रगतो ऽपि वाञ्छन्ति जनः सत्त्वानुरूपं फलम् ॥ ३० ॥

1.31

लाङ्गूलचालनम् अधश्चरणावपातंभूमौ निपत्य वदनोदरदर्शनं च ।श्वा पिण्डदस्य कुरुते गजपुङ्गवस् तुधीरं विलोकयति चाटुशतैश् च भुङ्क्ते ॥ ३१ ॥

1.32

परिवर्तिनि संसारेमृतः को वा न जायते ।स जातो येन जातेनयाति वंशः समुन्नतिम् ॥ ३२ ॥

1.33

कुसुमस्तवकस्येवद्वयी वृत्तिर् मनस्विनः ।मूर्ध्नि वा सर्वलोकस्यशीर्यते वन एव वा ॥ ३३ ॥

1.34

सन्त्य् अन्ये ऽपि बृहस्पतिप्रभृतयः सम्भाविताः पञ्चषास्तान् प्रत्य् एष विशेषविक्रमरुची राहुर् न वैरायते ।द्वाव् एव ग्रसते दिवाकरनिशाप्राणेश्वरौ भास्करौभ्रातः पर्वणि पश्य दानवपतिः शीर्षावशेषाकृतिः ॥ ३४ ॥

1.35

वहति भुवनश्रेणिं शेषः फणाफलकस्थितांकमठपतिना मध्येपृष्ठं सदा स च धार्यते ।तम् अपि कुरुते क्रोडाधीनं पयोधिर् अनादराद्अहह महतां निःसीमानश् चरित्रविभूतयः ॥ ३५ ॥

1.36

वरं पक्षच्छेदः समदमघवन्मुक्तकुलिशप्रहारैर्उद्गच्छद्बहुलदहनोद्गारगुरुभिः ।तुषाराद्रेः सूनोर् अहह पितरि क्लेशविवशेन चासौ सम्पातः पयसि पयसां पत्युर् उचितः ॥ ३६ ॥

1.37

सिंहः शिशुर् अपि निपततिमदमलिनकपोलभित्तिषु गजेषु ।प्रकृतिर् इयं सत्त्ववतांन खलु वयस् तेजसो हेतुः ॥ ३७ ॥

1.38

जातिर् यातु रसातलं गुणगणैस् तत्राप्य् अधो गम्यतांशीलं शैलतटात् पतत्व् अभिजनः सन्दह्यतां वह्निना ।शौर्ये वैरिणि वज्रम् आशु निपतत्व् अर्थो ऽस्तु नः केवलंयेनैकेन विना गुणस् तृणलवप्रायाः समस्ता इमे ॥ ३८ ॥

1.39

धनम् अर्जय काकुत्स्थधनमूलम् इदं जगत् ।अन्तरं नाभिजानामिनिर्धनस्य मृतस्य च ॥ ३९ ॥

1.40

तानीन्द्रियाण्य् अविकलानि तद् एव नामसा बुद्धिर् अप्रतिहता वचनं तद् एव ।अर्थोष्मणा विरहितः पुरुषः क्षणेनसो ऽप्य् अन्य एव भवतीति विचित्रम् एतत् ॥ ४० ॥

1.41

यस्यास्ति वित्तं स नरः कुलीनःस पण्डितः स श्रुतवान् गुणज्ञः ।स एव वक्ता स च दर्शनीयःसर्वे गुणाः काञ्चनम् आश्रयन्ति ॥ ४१ ॥

1.42

दौर्मन्त्र्यान् नृपतिर् विनश्यति यतिः सङ्गात् सुतो लालनात्विप्रो ऽनध्ययनात् कुलं कुतनयाच् छीलं खलोपासनात् ।ह्रीर् मद्याद् अनवेक्षणाद् अपि कृषिः स्नेहः प्रवासाश्रयान्मैत्री चाप्रणयात् समृद्धिर् अनयात् त्यागप्रमादाद् धनम् ॥ ४२ ॥

1.43

दानं भोगो नाशस् तिस्रोगतयो भवन्ति वित्तस्य ।यो न ददाति न भुङ्क्तेतस्य तृतीया गतिर् भवति ॥ ४३ ॥

1.44

मणिः शाणोल्लीढः समरविजयी हेतिदलितोमदक्षीणो नागः शरदि सरितः श्यानपुलिनाः ।कलाशेषश् चन्द्रः सुरतमृदिता बालवनितातन्निम्ना शोभन्ते गलितविभवाश् चार्थिषु नराः ॥ ४४ ॥

1.45

परिक्षीणः कश्चित् स्पृहयति यवानां प्रसृतयेस पश्चात् सम्पूर्णः कलयति धरित्रीं तृणसमाम् ।अतश् चानैकान्त्याद् गुरुलघुतया ऽर्थेषु धनिनाम्अवस्था वस्तूनि प्रथयति च सङ्कोचयति च ॥ ४५ ॥

1.46

राजन् दुधुक्षसि यदि क्षिति-धेनुम् एतां

तेनाद्य वत्सम् इव लोकम् अमुं पुषाणतस्मिंश् च सम्यग् अनिशं परिपोष्यमाणेनानाफलैः फलति कल्पलतेव भूमिः ॥ ४६ ॥

1.47

सत्यानृता च परुषा प्रियवादिनी चहिंस्रा दयालुर् अपि चार्थपरा वदान्या ।नित्यव्यया प्रचुरनित्यधनागमा चवाराङ्गनेव नृपनीतिर् अनेकरूपा ॥ ४७ ॥

1.48

आज्ञा कीर्तिः पालनं ब्राह्मणानां

दानं भोगो मित्रसंरक्षणं चयेषाम् एते षड्गुणा न प्रवृत्ताःको ऽर्थस् तेषां पार्थिवोपाश्रयेण ॥ ४८ ॥

1.49

यद् धात्रा निजभालपट्टलिखितं स्तोकं महद् वा धनंतत् प्राप्नोति मरुस्थले ऽपि नितरां मेरौ ततो नाधिकम् ।तद् धीरो भव वित्तवत्सु कृपणां वृत्तिं वृथा सा कृथाःकूपे पश्य पयोनिधाव् अपि घटो गृह्णाति तुल्यं जलम् ॥ ४९ ॥

1.50

त्वम् एव चातकाधारो ऽसीति केषां न गोचरः ।किम् अम्भोदवरास्माकंकार्पण्योक्तं प्रतीक्षसे ॥ ५० ॥

1.51

रे रे चातक सावधानमनसा मित्र क्षणं श्रूयताम्अम्भोदा बहवो वसन्ति गगने सर्वे ऽपि नैतादृशाः ।केचिद् वृष्टिभिर् आर्द्रयन्ति वसुधां गर्जन्ति केचिद् वृथायं यं पश्यसि तस्य तस्य पुरतो मा ब्रूहि दीनं वचः ॥ ५१ ॥

1.52

अकरुणत्वम् अकारणविग्रहःपरधने परयोषिति च स्पृहा ।सुजनबन्धुजनेष्व् असहिष्णुताप्रकृतिसिद्धम् इदं हि दुरात्मनाम् ॥ ५२ ॥

1.53

दुर्जनः परिहर्तव्योविद्यया ऽलकृतो ऽपि सन् ।मणिना भूषितः सर्पःकिम् असौ न भयङ्करः ॥ ५३ ॥

1.54

जाड्यं ह्रीमति गण्यते व्रतरुचौ दम्भः शुचौ कैतवंशूरे निर्घृणता मुनौ विमतिता दैन्यं प्रियालापिनि ।तेजस्विन्य् अवलिप्तता मुखरता वक्तर्य् अशक्तिः स्थिरेतत् को नाम गुणो भवेत् स गुणिनां यो दुर्जनैर् नाङ्कितः ॥ ५४ ॥

1.55

लोभश् चेद् अगुणेन किं पिशुनता यद्य् अस्ति किं पातकैःसत्यं चेत् तपसा च किं शुचि मनो यद्य् अस्ति तीर्थेन किम् ।सौजन्यं यदि किं गुणैः सुमहिमा यद्य् अस्ति किं मण्डनैःसद्विद्या यदि किं धनैर् अपयशो यद्य् अस्ति किं मृत्युना ॥ ५५ ॥

1.56

शशी दिवसधूसरो गलितयौवना कामिनीसरो विगतवारिजं मुखम् अनक्षरं स्वाकृतेः ।प्रभुर् धनपरायणः सततदुर्गतः सज्जनोनृपाङ्गणगतः खलो मनसि सप्त शल्यानि मे ॥ ५६ ॥

1.57

न कश्चिच् चण्डकोपानाम्आत्मीयो नाम भूभुजाम् ।होतारम् अपि जुह्वानंस्पृष्टो वहति पावकः ॥ ५७ ॥

1.58

मौनोमूकः प्रवचनपटुर् बाटुलो जल्पको वाधृष्टः पार्श्वे वसति च सदा दूरतश् चाप्रगल्भः ।क्षान्त्या भीरुर् यदि न सहते प्रायशो नाभिजातःसेवाधर्मः परमगहनो योगिनाम् अप्य् अगम्यः ॥ ५८ ॥

1.59

उद्भासिताखिलखलस्य विशृङ्खलस्यप्राग्जातविस्तृतनिजाधमकर्मवृत्तेः ।दैवाद् अवाप्तविभवस्य गुणद्विषो ऽस्यनीचस्य गोचरगतैः सुखम् आप्यते ॥ ५९ ॥

1.60

आरम्भगुर्वी क्षयिणी क्रमेणलघ्वी पुरा वृद्धिमती च पश्चात् ।दिनस्य पूर्वार्धपरार्धभिन्नाछायेव मैत्री खलसज्जनानाम् ॥ ६० ॥

1.61

मृगमीनसज्जनानां तृणजलसन्तोषविहितवृत्तीनाम् ।लुब्धकधीवरपिशुना निष्कारणवैरिणो जगति ॥ ६१ ॥

1.62

वाञ्छा सज्जनसङ्गमे परगुणे प्रीतिर् गुरौ नम्रताविद्यायां व्यसनं स्वयोषिति रतिर् लोकापवादाद् भयम् ।भक्तिः शूलिनि शक्तिर् आत्मदमने संसर्गमुक्तिः खलेयेष्व् एते निवसन्ति निर्मलगुणास् तेभ्यो नरेभ्यो नमः ॥ ६२ ॥

1.63

विपदि धैर्यम् अथाभ्युदये क्षमासदसि वाक्यपटुता युधि विक्रमः ।यशसि चाभिरुचिर् व्यसनं श्रुतौप्रकृतिसिद्धम् इदं हि महात्मनाम् ॥ ६३ ॥

1.64

प्रदानं प्रच्छन्नं गृहम् उपगते सम्भ्रमविधिःप्रियं कृत्वा मौनं सदसि कथनं चाप्य् उपकृतेः ।अनुत्सेको लक्ष्म्याम् अनभिभवगन्धाः परकथाःसतां केनोद्दिष्टं विषमम् असिधाराव्रतम् इदम् ॥ ६४ ॥

1.65

करे श्लाघ्यस् त्यागः शिरसि गुरुपादप्रणयितामुखे सत्या वाणी विजयि भुजयोर् वीर्यम् अतुलम् ।हृदि स्वच्छा वृत्तिः श्रुतिम् अधिगतं च श्रवणयोर्विनाप्य् ऐश्वर्येण प्रकृतिमहतां मण्डनम् इदम् ॥ ६५ ॥

1.66

सम्पत्सु महतां चित्तं भवत्य् उत्पल-कोमलम् ।आपत्सु च महाशैलशिला- सङ्घातकर्कशम् ॥ ६६ ॥

1.67

सन्तप्तायसि संस्थितस्य पयसो नामापि न ज्ञायतेमुक्ताकारतया तद् एव नलिनीपत्रस्थितं राजते ।स्वात्यां सागरशुक्तिमध्यपतितं तन्मौक्तिकं जायतेप्रायेणाधममध्यमोत्तमगुणः संसर्गतो जायते ॥ ६७ ॥

1.68

प्रीणाति यः सुचरितैः पितरं स पुत्रोयद् भर्तुर् एव हितम् इच्छति तत् कलत्रम् ।तन् मित्रम् आपदि सुखे च समक्रियं यद्एतत् त्रयं जगति पुण्यकृतो लभन्ते ॥ ६८ ॥

1.69

एको देवः केशवो वा शिवो वाह्य् एकं मित्रं भूपतिर् वा यतिर् वा ।एको वासः पत्तने वा वने वाह्य् एका भार्या सुन्दरी वा दरी वा ॥ ६९ ॥

1.70

नम्रत्वेनोन्नमन्तः परगुणकथनैः स्वान् गुणान् ख्यापयन्तःस्वार्थान् सम्पादयन्तो विततपृथुतरारम्भयत्नाः परार्थे ।क्षान्त्यैवाक्षेपरुक्षाक्षरमुखरमुखान् दुर्जनान् दूषयन्तःसन्तः साश्चर्यचर्या जगति बहुमताः कस्य नाभ्यर्चनीयाः ॥ ७० ॥

1.71

भवन्ति नम्रास् तरवः फलोद्गमैर्नवाम्बुभिर् दूरावलम्बिनो घनाः ।अनुद्धताः सत्पुरुषाः समृद्धिभिःस्वभाव एष परोपकारिणाम् ॥ ७१ ॥

1.72

श्रोत्रं श्रुतेनैव न कुण्डलेनदानेन पाणिर् न तु कङ्कणेन ।विभाति कायः करुणपराणांपरोपकारैर् न तु चन्दनेन ॥ ७२ ॥

1.73

पापान् निवारयति योजयते हितायगुह्यं निगूहति गुणान् प्रकटीकरोति ।आपद्गतं च न जहाति ददाति कालेसन्मित्रलक्षणम् इदं प्रवदन्ति सन्तः ॥ ७३ ॥

1.74

पद्माकरं दिनकरो विकचीकरोतिचन्द्रप् वोलासयति कैरवचक्रवालम् ।नाभ्यर्थितो जलधरो ऽपि जलं ददातिसन्तः स्वयं परहिते विहिताभियोगाः ॥ ७४ ॥

1.75

एके सत्पुरुषाः परार्थघटकाः स्वार्थं परित्यजन्ति येसामान्यास् तु परार्थम् उद्यमभृतः स्वार्थाविरोधेन ये ।ते ऽमी मानुषराक्षसाः परहितं स्वार्थाय निघ्नन्ति येये तु घ्नन्ति निरर्थकं परहितं ते के न जानीमहे ॥ ७५ ॥

1.76

क्षीरेणात्मगतोदकाय हि गुणा दत्ता पुरा ते ऽखिलाक्षीरोत्तापम् अवेक्ष्य तेन पयसा स्वात्मा कृशानौ हुतः ।गन्तुं पावकम् उन्मनस् तद् अभवद् दृष्ट्वा तु मित्रापदंयुक्तं तेन जलेन शाम्यति सतां मैत्री पुनस् त्व् ईदृशी ॥ ७६ ॥

1.77

इतः स्वपिति केशवः कुलम् इतस् तदीयद्विषाम्इतश् च शरणार्थिनां शिखरिणां गणाः शेरते ।इतो ऽपि बडवानलः सह समस्तसंवर्तकैऋअहो विततम् ऊर्जितं भरसहं सिन्धोर् वपुः ॥ ७७ ॥

1.78

तृष्णां छिन्धि भज क्षमां जहि मदं पापे रतिं मा कृथाःसत्यं ब्रूह्य् अनुयाहि साधुपदवीं सेवस्व विद्वज्जनम् ।मान्यान् मानय विद्विषो ऽप्य् अनुनय प्रख्यापय प्रश्रयंकीर्तिं पालय दुःखिते कुरु दयाम् एतत् सतां चेष्टितम् ॥ ७८ ॥

1.79

मनसि वचसि काये पुण्यपीयूषपूर्णास्त्रिभुवनम् उपकारश्रेणिभिः प्रीणयन्तः ।परगुणपरमाणून् पर्वतीकृत्य नित्यंनिजहृदि विकसन्तः सन्त सन्तः कियन्तः ॥ ७९ ॥

1.80

किं तेन हेमगिरिणा रजताद्रिणा वायत्राश्रिताश् च तरवस् तरवस् त एव ।मन्यामहे मलयम् एव यदाश्रयेणकङ्कोलनिम्बकटुजा अपि चन्दनाः स्युः ॥ ८० ॥

1.81

रत्नैर् महार्हैस् तुतुषुर् न देवान भेजिरे भीमविषेण भीतिम् ।सुधां विना न परयुर् विरामंन निश्चितार्थाद् विरमन्ति धीराः ॥ ८१ ॥

1.82

क्वचित् पृथ्वीशय्यः क्वचिद् अपि च परङ्कशयनःक्वचिच् छाकाहारः क्वचिद् अपि च शाल्योदनरुचिः ।क्वचित् कन्थाधारी क्वचिद् अपि च दिव्याम्बरधरोमनस्वी कार्यार्थी न गणयति दुःखं न च सुखम् ॥ ८२ ॥

1.83

ऐश्वर्यस्य विभूषणं सुजनता शौर्यस्य वाक्संयमोज्ञानस्योपशमः श्रुतस्य विनयो वित्तस्य पात्रे व्ययः ।अक्रोधस् तपसः क्षमा प्रभवितुर् धर्मस्य निर्वाजतासर्वेषाम् अपि सर्वकारणम् इदं शीलं परं भूषणम् ॥ ८३ ॥

1.84

निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तुलक्ष्मीः समाविशतु गच्छतु वा यथेष्ठम् ।अद्यैव वा मरणम् अस्तु युगान्तरे वान्याय्यात् पथः प्रविचलन्ति पदं न धीराः ॥ ८४ ॥

1.85

भग्नाशस्य करण्डपिण्डिततनोर् म्लानेन्द्रियस्य क्षुधाकृत्वाखुर् विवरं स्वयं निपतितो नक्तं मुखे भोगिनः ।तृप्तस् तत्पिशितेन सत्वरम् असौ तेनैव यातः यथालोकाः पश्यत दैवम् एव हि नृणां वृद्धौ क्षये कारणम् ॥ ८५ ॥

1.86

आलस्यं हि मनुष्याणांशरीरस्थो महान् रिपुः ।नास्त्य् उद्यमसमो बन्धुःकुर्वाणो नावसीदति ॥ ८६ ॥

1.87

छिन्नो ऽपि रोहति तर् क्षीणो ऽप्य् उपचीयते पुनश् चन्द्रः ।इति विमृशन्तः सन्तः सन्तप्यन्ते न दुःखेषु ॥ ८७ ॥

1.88

नेता यस्य बृहस्पतिः प्रहरणं वज्रं सुराः सैनिकाःस्वर्गो दुर्गम् अनुग्रहः किल हरेर् ऐरावतो वारणः ।इत्य् ऐश्वर्यबलान्वितो ऽपि बलभिद् भग्नः परैः सङ्गरेतद् व्यक्तं ननु दैवम् एव शरणं धिग् धिग् वृथा पौरुषम् ॥ ८८ ॥

1.89

कर्मायत्तं फलं पुंसांबुद्धिः कर्मानुसारिणी ।तथापि सुधिया भाव्यंसुविचार्यैव कुर्वता ॥ ८९ ॥

1.90

खल्व् आतो दिवसेश्वरस्य किरणैः सन्ताडितो मस्तकेवाञ्छन् देशम् अनातपं विधिवशात् तालस्य मूलं गतः ।तत्राप्य् अस्य महाफलेन पतता भग्नं सशब्दं शिरःप्रायो गच्छति यत्र भाग्यरहितस् तत्रैव यान्त्य् आपदः ॥ ९० ॥

1.91

रविनिशाकरयोर् ग्रहपीडनंगजभुजङ्गमयोर् अपि बन्धनम् ।मतिमतां च विलोक्य दरिद्रतांविधिर् अहो बलवान् इति मे मतिः ॥ ९१ ॥

1.92

सृजति तावद् अशेषगुणकरंपुरुषरत्नम् अलङ्करणं भुवः ।तद् अपि तत्क्षणभङ्गि करोतिचेद् अहह कष्टम् अपण्डितता विधेः ॥ ९२ ॥

1.93

पत्रं नैव यदा करीरविटपे दोषो वसन्तस्य किम्नोलूको ऽप्य् अवओकते यदि दिवा सूर्यस्य किं दूषणम् ।धारा नैव पतन्ति चातकमुखे मेघस्य किं दूषणम्यत् पूर्वं विधिना ललाटलिखितं तन् मार्जितुं कः क्षमः ॥ ९३ ॥

1.94

नमस्यामो देवान् ननु हतविधेस् ते ऽपि वशगाविधिर् वन्द्यः सो ऽपि प्रतिनियतकर्मैकफलदः ।फलं कर्मायत्तं यदि किम् अमरैः किं च विधिनानमस् तत्कर्मभ्यो विधिर् अपि न येभ्यः प्रभवति ॥ ९४ ॥

1.95

ब्रह्मा येन कुलालवन् नियमितो ब्रह्माडभाण्डोदरेविष्णुर् येन दशावतारगहने क्षिप्तो महासङ्कटे ।रुद्रो येन कपालपाणिपुटके भिक्षाटनं कारितःसूर्यो भ्राम्यति नित्यम् एव गगने तस्मै नमः कर्मणे ॥ ९५ ॥

1.96

नैवाकृतिः फलति नैवअ कुलं न शीलंविद्यापि नैव न च यत्नकृतापि सेवा ।भाग्यानि पूर्वतपसा खलु सञ्चितानिकाले फलन्ति पुरुषस्य यथैव वृक्षाः ॥ ९६ ॥

1.97

वने रणे शत्रुजलाग्निमध्येमहार्णवे पर्वतमस्तके वा ।सुप्तं प्रमत्तं विषमस्थितं वारक्षन्ति पुण्यानि पुराकृतानि ॥ ९७ ॥

1.98

या साधूंश् च खलान् करोति विदुषो मूर्खान् हितान् द्वेषिणःप्रत्यक्षं कुरुते परीक्षम् अमृतं हालाहलं तत्क्षणात् ।ताम् आराधय सत्क्रियां भगवतीं भोक्तुं फलं वाञ्छितंहे साधो व्यसनैर् गुणेषु विपुलेष्व् आस्थां वृथा मा कृथाः ॥ ९८ ॥

1.99

गुणवद् अगुणवद् वा कुर्वता कार्यजातंपरिणतिर् अवधार्या यत्नतः पण्डितेन ।अतिरभसकृतानां कर्मणाम् आविपत्तेर्भवति हृदयदाही शल्यतुल्यो विपाकः ॥ ९९ ॥

1.100

स्थाल्यां वैदूर्यमय्यां पचति तिलकणांश् चन्दनैर् इन्धनौघैःसौवर्णैर् लाङ्गलाग्रैर् विलिखति वसुधाम् अर्कमूलस्य हेतोः ।कृत्वा कर्पूरखण्डान् वृत्तिम् इह कुरुते कोद्रवाणां समन्तात्प्राप्येमां कर्म्भूमिं न चरति मनुजो यस् तोप मन्दभाग्यः ॥ १०० ॥

1.101

मज्जत्व् अम्भसि यातु मेरुशिखरं शत्रुं जयत्व् आहवेवाणिज्यं कृषिसेवने च सकला विद्याः कलाः शिक्षताम् ।आकाशं विपुलं प्रयातु खगवत् कृत्वा प्रयत्नं परंनाभाव्यं भवतीह कर्मवशतो भाव्यस्य नाशः कुतः ॥ १०१ ॥

1.102

भीमं वनं भवति तस्य पुरं प्रधानंसर्वो जनः स्वजनताम् उपयाति तस्य ।कृत्स्ना च भूर् भवति सन्निधिरत्नपूर्णायस्यास्ति पूर्वसुकृतं विपुलं नरस्य ॥ १०२ ॥

1.103

को लाभो गुणिसङ्गमः किम् असुखं प्राज्ञेतरैः सङ्गतिःका हानिः समयच्युतिर् निपुणता का धर्मतत्त्वे रतिः ।कः शूरो विजितेन्द्रियः प्रियतमा का ऽनुव्रता किं धनंविद्या किं सुखम् अप्रवासगमनं राज्यं किम् आज्ञाफलम् ॥ १०३ ॥

1.104

अप्रियवचनदरिद्रैः प्रियवचनधनाढ्यैः स्वदारपरितुष्टैः ।परपरिवादनिवृत्तैः क्वचित् क्वचिन् मण्डिता वसुधा ॥ १०४ ॥

1.105

कदर्थितस्यापि हि धैर्यवृत्तेर्न शक्यते धैर्यगुणः प्रमार्ष्टुम् ।अधोमुखस्यापि कृतस्य वह्नेर्नाधः शिखा याति कदाचिद् एव ॥ १०५ ॥

1.106

कान्ताकटाक्षविशिखा न लुनन्ति यस्यचित्तं न निर्दहति किपकृशानुतापः ।कर्षन्ति भूरिविषयाश् च न लोभपाशैर्लोकत्रयं जयति कृत्स्नम् इदं स धीरः ॥ १०६ ॥

1.107

एकेनापि हि शूरेणपादाक्रान्तं महीतलम् ।क्रियते भास्करेणैवस्फारस्फुरिततेजसा ॥ १०७ ॥

1.108

वह्निस् तस्य जलायते जलनिधिः कुल्यायते तत्क्षणान्मेरुः स्वल्पशिलायते मृगपतिः सद्यः कुरङ्गायते ।व्यालो माल्यगुणायते विषरसः पीयूषवर्षायतेयस्याङ्गे ऽखिललोकवल्लभतमं शीलं समुन्मीलति ॥ १०८ ॥

1.109

लज्जागुणौघजननीं जननीम् इव स्वाम्अत्यन्तशुद्धहृदयाम् अनुवर्तमानाम् ।तेजस्विनः सुखम् असून् अपि सन्त्यजनतिसत्यव्रतव्यसनिनो न पुनः प्रतिज्ञाम् ॥ १०९ ॥

2.head

## शृङ्गारशतकम्

2.1

शम्भुस्वयम्भुहरयो हरिणेक्षणानांयेनाक्रियन्त सततं गृहकुम्भदासाः ।वाचाम् अगोचरचरित्रविचित्रितायतस्मै नमो भगवते मकरध्वजाय ॥ १ ॥

2.2

स्मितेन भावेन च लज्जया भियापराण्मुखैर् अर्धकटाक्षवीक्षणैः ।वचोभिर् ईर्ष्याकलहेन लीलयासमस्तभावैः खलु बन्धनं स्त्रियः ॥ २ ॥

2.3

भ्रूचातुर्यात् कुञ्चिताक्षाः कटाक्षाःस्निग्धा वाचो लज्जितान्ताश् च हासाः ।लीलामन्दं प्रस्थितं च स्थितं चस्त्रीणाम् एतद् भूषणं चायुधं च ॥ ३ ॥

2.4

क्वचित् सभ्रूभङ्गैः क्वचिद् अपि च लज्जापरिगतैःक्वचिद् भूरित्रस्तैः क्वचिद् अपि च लीलाविललितैः ।कुमारीणाम् एतैर् मदनसुभगैर् नेत्रवलितैःस्फुरन्नीलाब्जानां प्रकरपरिकीर्णा इव दिशः ॥ ४ ॥

2.5

वक्त्रं चन्द्रविकासि पङ्कजपरीहासक्षमे लोचनेवर्णः स्वर्णम् अपाकरिष्णुर् अलिनीजिष्णुः कचानां चयः ।बक्षोजाव् इभकुम्भविभ्रमहरौ गुर्वी नितम्बस्थलीवाचां हारि च मार्दवं युवतीषु स्वाभाविकं मण्डनम् ॥ ५ ॥

2.6

स्मितकिञ्चिन्मुग्धं सरलतरलो दृष्टिविभवःपरिस्पन्दो वाचाम् अभिनवविलासोक्तिसरसः ।गतानाम् आरम्भः किसलयितलीलापरिकरःस्पृशन्त्यास् तारुण्यं किम् इव न हि रम्यं मृगदृशः ॥ ६ ॥

2.7

द्रष्टव्येषु किम् उत्तमं मृगदृशः प्रेमप्रसन्नं मुखंघ्रातवेष्व् अपि किं तदास्यपवनः श्रव्येषु किं तद्वचः ।किं स्वाद्येषु तदोष्ठपल्लवरसः स्पृश्येषु किं तद्वपुर्ध्येयंकिं नवयौवने सहृदयैः सर्वत्र तद्विभ्रमाः ॥ ७ ॥

2.8

एताश् चलद्वलयसंहतिमेखलोत्थझङ्कारनूपुरपराजितराजहंस्यः ।कुर्वन्ति कस्य न मनो विवशं तरुण्योवित्रस्तमुग्धहरिणीसदृशैः कटाक्षैः ॥ ८ ॥

2.9

कुङ्कुमपङ्ककलङ्कितदेहागौरपयोधरकम्पितहारा ।नूपुरहंसरणत्पद्माकं न वशीकुरुते भुवि रामा ॥ ९ ॥

2.10

नूनं हि ते कविवरा विपरीतवाचोये नित्यम् आहुर् अबला इति कामिनीस् ताः ।याभिर् विलोलितरतारकदृष्टिपातैःशक्रादयो ऽपि विजितास् त्व् अबलाः कथं ताः ॥ १० ॥

2.11

नूनम् आज्ञाकरस् तस्याः सुभ्रुवो मकरध्वजः ।यतस् तन्नेत्रसञ्चारसूचितेषु प्रवर्तते ॥ ११ ॥

2.12

केशाः संयमिनः श्रुतेर् अपि परं पारं गते लोचनेअन्तर्वक्त्रम् अपि स्वभावशुचिभीः कीर्णं द्विजानां गणैः ।मुक्तानां सतताधिवासरुचिरौ वक्षोजकुम्भाव् इमावित्थंतन्वि वपुः प्रशान्तम् अपि तेरागं करोत्य् एव नः ॥ १२ ॥

2.13

मुग्धे धानुष्कता केयम् अपूर्वा त्वयि दृश्यते ।यया विध्यसि चेतांसि गुणैर् एव न सायकैः ॥ १३ ॥

2.14

सति प्रदीपे सत्य् अग्नौ सत्सु तारारवीन्दुषु ।विना मे मृगशावाक्ष्या तमोभूतम् इदं जगत् ॥ १४ ॥

2.15

उद्वृत्तः स्तनभार एष तरले नेत्रे चले भ्रूलतेरागाधिष्ठितम् ओष्ठपल्लवम् इदं कुर्वन्तु नाम व्यथाम् ।सौभाग्याक्षरमालिकेव लिखिता पुष्पायुधेन स्वयंमध्यस्थापि करोति तापम् अधिकं रोमावलिः केन सा ॥ १५ ॥

2.16

मुखेन चन्द्रकान्तेन महानीलैः शिरोरुहैः ।कराभ्यां पद्मरागाभ्यां रेजे रत्नमयीव सा ॥ १६ ॥

2.17

गुरुणा स्तनभारेण मुखचन्द्रेण भास्वता ।शनैश्चराभ्यां पादाभ्यां रेजे ग्रहमयीव सा ॥ १७ ॥

2.18

तस्याः स्तनौ यदि घनौ जघनं च हारिवक्रं च चारु तव चित्त किम् आकुलत्वम् ।पुण्यं कुरुष्व यदि तेषु तवास्ति वाञ्छापुण्यैर् विना न हि भवन्ति समीहितार्थाः ॥ १८ ॥

2.19

इमे तारुण्यश्रीनवपरिमलाः प्रौढसुरतप्रतापप्रारम्भाः स्मरविजयदानप्रतिभुवः ।चिरं चेतश् चोरा अभिनवविकारैकगुरवोविलासव्यापाराः किम् अपि विजयन्ते मृगदृशाम् ॥ १९ ॥

2.20

प्रणयमधुराः प्रेमोद्गारा रसाश्रयतां गताःफणितिमधुरा मुग्धप्रायाः प्रकाशितसम्मदाः ।प्रकृतिसुभगा विस्रम्भार्द्राः स्मरोदयदायिनीरहसि किम् अपि स्वैरालापा हरन्ति मृगीदृशाम् ॥ २० ॥

2.21

विश्रम्य विश्रम्य वनद्रुमाणांछायासु तन्वी विचचार काचित् ।स्तनोत्तरीयेण करोद्धृतेननिवारयन्ती शशिनो मयूखान् ॥ २१ ॥

2.22

अदर्शने दर्शनमात्रकामादृष्ट्वा परिष्वङ्गसुखैकलोला ।आलिङ्गितायां पुनर् आयताक्ष्यामाशास्महेविग्रहयोर् अभेदम् ॥ २२ ॥

2.23

मालती शिरसि जृम्भणं मुखेचन्दनं वपुषि कुङ्कुमाविलम् ।वक्षसि प्रियतमा मदालसास्वर्ग एष परिशिष्ट आगमः ॥ २३ ॥

2.24

प्राङ् माम् एति मनाग् अनागतरसं जाताभिलाषां ततःसव्रीडं तद् अनु श्लथोद्यमम् अथ प्रध्वस्तधैर्यं पुनः ।प्रेमार्द्रं स्पृहणीयनिर्भररहः क्रीडाप्रगल्भं ततोनिःसङ्गाङ्गविकर्षणाधिकसुखरम्यं कुलस्त्रीरतम् ॥ २४ ॥

2.25

उरसि निपतितानां स्रस्तधम्मिल्लकानांमुकुलितनयनानां किञ्चिदुन्मीलितानाम् ।उपरि सुरतखेदस्विन्नगण्डस्थलानामधरमधु वधूनां भाग्यवन्तः पिबन्ति ॥ २५ ॥

2.26

आमीलितनयनानां यःसुरतरसो ऽनु संविदं भाति ।मिथुरैर् मिथो ऽवधारितमवितथम्इदम् एव कामनिर्बर्हणम् ॥ २६ ॥

2.27

इदम् अनुचितम् अक्रमश् च पुंसांयद् इह जरास्व् अपि मन्मथा विकाराः ।तद् अपि च न कृतं नितम्बिनीनांस्तनपतनावधि जीवितं रतं वा ॥ २७ ॥

2.28

राजस्तृष्णाम्बुराशेर् न हि जगति गतः कश्चिद् एवावसानंको वार्थो ऽर्थैः प्रभूतैः स्ववपुषि गलिते यौवने सानुरागे ।गच्छामः सद्म यावद् विकसितनयनेन्दीवरालोकिनीनामाक्रम्याक्रम्यरूपं झटिति न जरया लुप्यते प्रेयसीनाम् ॥ २८ ॥

2.29

रागस्यागारम् एकं नरकशतमहादुःखसम्प्राप्तिहेतुर्मोहस्योत्पत्तिबीजं जलधरपटलं ज्ञानताराधिपस्य ।कन्दर्पस्यैकमित्रं प्रकटितविविधस्पष्टदोषप्रबन्धंलोके ऽस्मिन् न ह्य् अर्थव्रजकुलभवनयौवनाद् अन्यद् अस्ति ॥ २९ ॥

2.30

शृङ्गारद्रुमनीरदे प्रसृमरक्रीडारसस्रोतसिप्रद्युम्नप्रियबान्धवे चतुरवाङ्मुक्ताफलोदन्वति ।तन्वीनेत्रचकोरपावनविधौ सौभाग्यलक्ष्मीनिधौधन्यः को ऽपि न विक्रियां कलयति प्राप्ते नवे यौवने ॥ ३० ॥

2.31

संसारे ऽस्मिन्न् असारे कुनृपतिभवनद्वारसेवाकलङ्कव्यासङ्गव्यस्तधैर्यं कथम् अमलधियो मानसं संविदध्युः ।यद्य् एताः प्रोद्यदिन्दुद्युतिनिचयभृतो न स्युर् अम्भोजनेत्राःप्रेङ्खत्काञ्चीकलापाः स्तनभरविनमन्मध्यभाजस् तरुण्यः ॥ ३१ ॥

2.32

सिद्धाध्यासितकन्दरे हरवृषस्कन्धावरुग्णद्रुमेगङ्गाधौतशिलातले हिमवतः स्थाने स्थिते श्रेयसि ।कः कुर्वीत शिरः प्रणाममलिनं म्लानं मनस्वी जनोयद्वित्रस्तकुरङ्गशावनयना न स्युः स्मरास्त्रं स्त्रियः ॥ ३२ ॥

2.33

संसार तव पर्यन्तपदवी न दवीयसी ।अन्तरा दुस्तरा न स्युर् यदि ते मदिरेक्षणाम् ॥ ३३ ॥

2.34

दिश वनहरिणीभ्यो वंशकाण्डच्छवीनांकवलम् उपलकोटिच्छिन्नमूलं कुशानाम् ।
शकयुवतिकपोलापाण्डुताम्बूलवल्लीदलम्अरुणनखाग्रैः पाटितं वा वधूभ्यः ॥ ३४ ॥

2.35

असाराः सर्वे ते विरतिविरसाः पापविषयाजुगुप्स्यन्तां यद् वा ननु सकलदोषास्पदम् इति ।तथाप्य् एतद्भूमौ नहि परहितात् पुण्यम् अधिकंन चास्मिन् संसारे कुवलयदृशो रम्यम् अपरम् ॥ ३५ ॥

2.36

एतत्कामफलो लोके यद् द्वयोर् एकचित्तता ।अन्यचित्तकृते कामे शवयोर् इव सङ्गमः ॥ ३५*१ ॥

2.37

मात्सर्यम् उत्सार्य विचार्य कार्यमार्याःसमर्यादम् इदं वदन्तु ।सेव्या नितम्बाः किम् उ भूधराणामतस्मरस्मेरविलासिनीनाम् ॥ ३६ ॥

2.38

संसारे स्वप्नसारे परिणतितरले द्वे गती पण्डितानांतत्त्वज्ञानामृताम्भःप्लवललितधियां यातु कालः कथञ्चित् ।नो चेन् मुग्धाङ्गनानां स्तनजघनघनाभोगसम्भोगिनीनांस्थूलोपस्थस्थलीषु स्थगितकरतलस्पर्शलीलोद्यमानाम् ॥ ३७ ॥

2.39

आवासः क्रियतां गङ्गे पापहारिणि वारिणि ।स्तनद्वये तरुण्या वा मनोहारिणि हारिणि ॥ ३८ ॥

2.40

किम् इह बहुभिर् उक्तैर् युक्तिशून्यैः प्रलापैर्द्वयम्इह पुरुषाणां सर्वदा सेवनीयम् ।अभिनवमदलीलालालसं सुन्दरीणांस्तनभरपरिखिन्नं यौवनं वा वनं वा ॥ ३९ ॥

2.41

सत्यं जना वच्मि न पक्षपाताल्लोकेषु सप्तस्व् अपि तथ्यम् एतत् ।नान्यन् मनोहारि नितम्बिनीभ्योदुःखैकहेतुर् न च कश्चिद् अन्यः ॥ ४० ॥

2.42

कान्तेत्य् उत्पललोचनेति विपुलश्रोणीभरेत्य् उन्नमत्पीनोत्तुङ्गपयोधरेति समुखाम्भोजेति सुभ्रूर् इति ।दृष्ट्वा माद्यति मोदते ऽभिरमते प्रस्तौति विद्वान् अपिप्रत्यक्षाशुचिभस्त्रिकां स्त्रियम् अहो मोहस्य दुश्चेष्टितम् ॥ ४१ ॥

2.43

स्मृता भवति तापाय दृष्टा चोन्मादकारिणी ।स्पृष्टा भवति मोहाय सा नाम दयिता कथम् ॥ ४२ ॥

2.44

तावद् एवामृतमयी यावल् लोचनगोचरा ।चक्षुष्पथाद् अतीता तु विषाद् अप्य् अतिरिच्यते ॥ ४३ ॥

2.45

नामृतं न विषं किञ्चिद् एतां मुक्त्वा नितम्बिनीम् ।सैवामृतलता रक्ता विरक्ता विषवल्लरी ॥ ४४ ॥

2.46

आवर्तः संशयानाम् अविनयभुवनं पट्टणं साहसानांदोषाणां सन्निधानं कपटशतमयं क्षेत्रम् अप्रत्ययानाम् ।स्वर्गद्वारस्य विघ्नो नरकपुरमुख सर्वमायाकरण्डंस्त्रीयन्त्रं केन सृष्टं विषम् अमृतमयं प्राणिलोकस्य पाशः ॥ ४५ ॥

2.47

नो सत्येन मृगाङ्क एष वदनीभूतो न चेन्दीवरद्वन्द्वंलोचनतां गत न कनकैर् अप्य् अङ्गयष्टिः कृता ।किन्त्व् एवं कविभिः प्रतारितमनास् तत्त्वं विजानन्न् अपित्वङ्मांसास्थिमयं वपुर् मृगदृशां मन्दो जनः सेवते ॥ ४६ ॥

2.48

लीलावतीनां सहजा विलासास्तएव मूढस्य हृदि स्फुरन्ति ।रागो नलिन्या हि निसर्गसिद्धस्तत्रभ्रम्त्य् एव वृथा षडङ्घ्रिः ॥ ४७ ॥

2.49

संमोहयन्ति मदयन्ति विडम्बयन्तिनिर्भर्त्सयन्ति रमयन्ति विषादयन्ति ।एताः प्रविश्य सदयं हृदयं नराणांकिं नाम वामनयना न समाचरन्ति ॥ ४७*१ ॥

2.50

यद् एतत् पूर्णेन्दुद्युतिहरम् उदाराकृति परंमुखाब्जं तन्वङ्ग्याः किल वसति यत्राधरमधु ।इदं तत् किं पाकद्रुमफलम् इदानीम् अतिरसव्यतीते ऽस्मिन्काले विषम् इव भविष्यत्य् असुखदम् ॥ ४८ ॥

2.51

उन्मीलत्त्रिवलीतरङ्गनिलया प्रोत्तुङ्गपीनस्तनद्वन्द्वेनोद्गतचक्रवाकयुगला वक्त्राम्बुजोद्भासिनी ।कान्ताकारधरा नदीयम् अभितः क्रूरात्र नापेक्षतेसंसारार्णवमज्जनं यदि तदा दूरेण सन्त्यज्यताम् ॥ ४९ ॥

2.52

जल्पन्ति सार्धम् अन्येन पश्यन्त्य् अन्यं सविभ्रमाः ।हृद्गतं चिन्तयन्त्य् अन्यं प्रियः को नाम योषिताम् ॥ ५० ॥

2.53

मधु तिष्ठति वाचि योषितां हृदि हालाहलम् एव केवलम् ।अतएव निपीयते ऽधरो हृदयं मुष्टिभिर् एव ताड्यते ॥ ५१ ॥

2.54

अपसर सखे दूराद् अस्मात् कटाक्षविषानलात्प्रकृतिविषमाद् योषित्सर्पाद् विलासफणाभृतः ।इतरफणिना दष्टः शक्यश् चिकित्सितुम् औषधैश्चतुर्वनिताभोगिग्रस्तं हि मन्त्रिणः ॥ ५२ ॥

2.55

विस्तारितं मकरकेतनधीवरेणस्त्रीसंज्ञितं बडिशम् अत्र भवाम्बुराशौ ।येनाचिरात् तदधरामिषलोलमर्त्यमत्स्यान् विकृष्य विपचत्य् अनुरागवह्नौ ॥ ५३ ॥

2.56

कामिनीकायकान्तारे कुचपर्वतदुर्गमे ।मा संचर मनः पान्थ तत्रास्ते स्मरतस्करः ॥ ५४ ॥

2.57

व्यादीर्घेण चलेन वक्रगतिना तेजस्विना भोगिनानीलाब्जद्युतिनाहिना परम् अहं दृष्टो न तच्चक्षुषा ।दृष्टे सन्ति चिकित्सका दिशि दिशि प्रायेण दर्मार्थिनोमुग्धाक्षक्षणवीक्षितस्य न हि मे वैद्यो न चाप्य् औषधम् ॥ ५५ ॥

2.58

इह हि मधुरगीतं नृत्यम् एतद्रसो ऽयंस्फुरति परिमलो ऽसौ स्पर्श एष स्तनानाम् ।इति हतपरमार्थैर् इन्द्रियैर् भ्राम्यमाणःस्वहितकरणधूर्तैः पञ्चभिर् वञ्चितो ऽस्मि ॥ ५६ ॥

2.59

न गम्यो मन्त्राणां न च भवति भैषज्यविषयोन चापि प्रध्वंसं व्रजति विविधैः शान्तिकशतैः ।भ्रमावेशाद् अङ्गे कम् अपि विदधद् भङ्गम् असकृत्स्मरापस्मारो ऽयं भ्रमयति दृशं घूर्णयति च ॥ ५७ ॥

2.60

जात्यन्धाय च दुर्मुखाय च जराजीर्णा खिलाङ्गाय चग्रामीणाय च दुष्कुलाय च गलत्कुष्ठाभिभूताय च ।यच्छन्तीषु मनोहरं निजवपुलक्ष्मीलवश्रद्धयापण्यस्त्रीषु विवेककल्पलतिकाशस्त्रीषु राज्येत कः ॥ ५८ ॥

2.61

वेश्यासौ मदनज्वालारूपे ऽन्धनविवर्धिता ।कामिभिर् यत्र हूयन्तेयौवनानि धनानि च ॥ ५९ ॥

2.62

कश् चुम्बति कुलपुरुषो वेश्याधरपल्लवं मनोज्ञम् अपि ।चारभटचोरचेटकनटविटनिष्ठीवनशरावम् ॥ ६० ॥

2.63

धन्यास् त एव धवलायतलोचनानांतारुण्यदर्पघनपीनपयोधराणाम् ।क्षामोदरोपरि लसत्त्रिवलीलतानांदृष्ट्वाकृतिं विकृतिम् एति मनो न येषाम् ॥ ६१ ॥

2.64

बाले लीलामुकुलितम् अमी मन्थरा दृष्टिपाताःकिं क्षिप्यन्ते विरमविरम व्यर्थ एष श्रमस् ते ।सम्प्रत्य् अन्ये वयम् उपरतं बाल्यम् आस्था वनान्तेक्षीणो मोहस् तृणम् इव जगज्जालम् आलोकयामः ॥ ६२ ॥

2.65

इयं बाला मां प्रत्य् अनवरतम् इन्दीवरदलप्रभाचीरं चक्षुः क्षिपति किम् अभिप्रेतम् अनया ।गतो मोहो ऽस्माकं स्मरशबरबाणव्यतिकरज्वरज्वाला शान्ता तद् अपि न वराकी विरमति ॥ ६३ ॥

2.66

किं कन्दर्प करं कदर्थयसि रे कोदण्डटङ्कारितंरे रे कोकिल कोमलं कलरवं किं वा वृथा जल्पसि ।मुग्धे स्निग्धविदग्धचारुमधुरैर् लोलैः कटाक्षैर् अलंचेतश् चुम्बितचन्द्रचूडचरणध्यानामृतं वर्तते ॥ ६४ ॥

2.67

विरहे ऽपि सङ्गमः खलुपरस्परं सङ्गतं मनो येषाम् ।हृदयम् अपि विघट्टितं चेत्सङ्गी विरहं विशेषयति ॥ ६५ ॥

2.68

किं गतेन यदि सा न जीवतिप्राणिति प्रियतमा तथापि किम् ।इत्य् उदीक्ष्य नवमेघमालिकांन प्रयाति पथिकः स्वमन्दिरम् ॥ ६६ ॥

2.69

विरमत बुधा योषित्सङ्गात् सुखात् क्षणभङ्गुरात्कुरुत करुणामैत्रीप्रज्ञावधूजनसङ्गमम् ।न खलु नरके हाराक्रान्तं घनस्तनमण्डलंशरणम् अथवा श्रोणीबिम्बं रणन्मणिमेखलम् ॥ ६७ ॥

2.70

यदा योगाभ्यासव्यसनकृशयोर् आत्ममनसोरविच्छिन्नामैत्री स्फुरति कृतिनस् तस्य किम् उ तैः ।प्रियाणाम् आलापैर् अधरमधुभिर् वक्त्रविधुभिःसनिश्वासामोदैः सकुचकलशाश्लेषसुरतैः ॥ ६८ ॥

2.71

यदासीद् अज्ञानं स्मरतिमिरसञ्चारजनितंतदा दृष्टनारीमयम् इदम् अशेषं जगद् इति ।इदानीम् अस्माकं पटुतरविवेकाञ्जनजुषांसमीभूता दृष्टिस् त्रिभुवनम् अपि ब्रह्म मनुते ॥ ६९ ॥

2.72

तावद् एव कृतिनाम् अपि स्फुरत्येषनिर्मलविवेकदीपकः ।यावद् एव न कुरङ्गचक्षुषांताड्यते चटुललोचनाञ्चलैः ॥ ७० ॥

2.73

वचसि भवति सङ्गत्यागम् उद्दिश्य वार्ताश्रुतिमुखरमुखानां केवलं पण्डितानाम् ।जघनम् अरुणरत्नग्रन्थिकाञ्चीकलापंकुवलयनयनानां को विहातुं समर्थः ॥ ७१ ॥

2.74

स्वपरप्रतारको ऽसौनिन्दति यो ऽलीकपण्डितो युवतीः ।यस्मात् तपसो ऽपि फलंस्वर्गः स्वर्गे ऽपि चाप्सरसः ॥ ७२ ॥

2.75

मत्तेभकुम्भदलने भुवि सन्ति धीराःकेचित् प्रचण्डमृगराजवधे ऽपि दक्षाः ।किन्तु ब्रवीमि बलिनां पुरतः प्रसह्यकन्दर्पदर्पदलने विरला मनुष्याः ॥ ७३ ॥

2.76

सन्मार्गे तावद् आस्ते प्रभवति च नरस् तावद् एवेन्द्रियाणांलज्जां तावद् विधत्ते विनयम् अपि समालम्बते तावद् एव । भ्रूचापाकृष्टमुक्ताः श्रवणपथगता नीलपक्ष्माण एतेयावल् लीलावतीनां हृदि न धृतिमुषो दृष्टिबाणाः पतन्ति ॥ ७४ ॥

2.77

उन्मत्तप्रेमसंरम्भाद्आरभन्ते यदङ्गनाः ।तत्र प्रत्यूहम् आधातुंब्रह्मापि खलु कातरः ॥ ७५ ॥

2.78

तावन् महत्त्वं पाण्डित्यंकुलीनत्वं विवेकिता ।यावज् ज्वलति नाङ्गेषुहतः पञ्चेषुपावकः ॥ ७६ ॥

2.79

शास्त्रज्ञो ऽपि प्रगुणितनयो ऽत्यान्तबाधापि बाढंसंसारे ऽस्मिन् भवति विरलो भाजनं सद्गतीनाम् ।येनैतस्मिन् निरयनगरद्वारम् उद्घाटयन्तीवामाक्षीणां भवति कुटिला भ्रूलता कुञ्चिकेव ॥ ७७ ॥

2.80

कृशः काणः खञ्जः श्रवणरहितः पुच्छविकलोव्रणी पूयक्लिन्नः कृमिकुलशतैर् आवृततनुः ।क्षुधा क्षामो जीर्णः पिठरककपालार्पितगलःशुनीम् अन्वेति श्वा हतम् अपि च हन्त्य् एव मदनः ॥ ७८ ॥

2.81

स्त्रीमुद्रां कुसुमायुधस्य जयिनीं सर्वार्थसम्पत्करींये मूढाः प्रविहाय यान्ति कुधियो मिथ्याफलान्वेषिणः ।ते तेनैव निहत्य निर्दयतरं नग्नीकृता मुण्डिताःकेचित् पञ्चशिखीकृताश् च जटिलाः कापालिकाश् चापरे ॥ ७९ ॥

2.82

विश्वामित्रपराशरप्रभृतयो वाताम्बुपर्णाशनास्ते ऽपिस्त्रीमुखपङ्कजं सुललितं दृष्ट्वैव मोहं गताः ।शाल्यन्नं सघृतं पयोदधियुतं ये भुञ्जते मानवास्तेषाम्इन्द्रियनिग्रहो यदि भवेद् विन्ध्यः प्लवेत् सागरे ॥ ८० ॥

2.83

परिमलभृतो वाताः शाखा नवाङ्कुरकोटयोमधुरविधुरोत्कण्ठाभाजः प्रिया पिकपक्षिणाम् ।विरलविरसस्वेदोद्गारा वधूवदनेन्दवःप्रसरति मधौ धात्र्यां जातो न कस्य गुणोदयः ॥ ८१ ॥

2.84

मधुर् अयं मधुरैर् अपि कोकिलाकलरवैर् मलयस्य च वायुभिः ।विरहिणः प्रहिणस्ति शरीरिणोविपदि हन्त सुधापि विषायते ॥ ८२ ॥

2.85

आवासः किलकिञ्चितस्य दयितापार्श्वे विलासालसाःकर्णे कोकिलकामिनीकलरवः स्मेरो लतामण्डपः ।गोष्ठी सत्कविभिः समं कतिपयैर् मुग्धाः सुधांशोः कराःकेषांचित् सुखयन्ति चात्र हृदयं चैत्रे विचित्राः क्षपाः ॥ ८३ ॥

2.86

पान्थ स्त्रीविरहानलाहुतिकलाम् आतन्वती मञ्जरीमाकन्देषुपिकाङ्गनाभिर् अधुना सोत्कण्ठम् आलोक्यते ।अप्य् एते नवपाटलापरिमलप्राग्भारपाटच्चरावान्तिक्लान्तिवितानतानवकृतः श्रीखण्डशैलानिलाः ॥ ८४ ॥

2.87

प्रथितः प्रणयवतीनांतावत् पदम् आतनोतु हृदि मानः ।भवति न यावच् चन्दनतरुसुरभिर् मलयपवमानः ॥ ८५ ॥

2.88

सहकारकुसुमकेसरनिकरभरामोदमूर्च्छितदिगन्ते ।मधुरमधुरविधुरमधुपेमधौ भवेत् कस्य नोत्कण्ठा ॥ ८६ ॥

2.89

अच्छाच्छचन्दनरसार्द्रतरा मृगाक्ष्योधारागृहाणि कुसुमानि च कौमुदी च ।मन्दो मरुत् सुमनसः शुचि हर्म्यपृष्ठंग्रीष्मे मदं च मदनं च विवर्धयन्ति ॥ ८७ ॥

2.90

स्रजो हृद्य् आमोदा व्यजनपवनश् चन्द्रकिरणाःपरागः कासारो मलयजरजः शीधु विशदम् ।शुचिः सौधोत्सङ्गः प्रतनु वसनं पङ्कजदृशोनिदाघर्ताव् एतद् विलसति लभन्ते सुकृतिनः ॥ ८८ ॥

2.91

सुधाशुभ्रं धाम स्फुरदमलरश्मिः शशधरःप्रियावक्त्राम्भोजं मलयजरजश् चातिसुरभिः ।स्रजो हृद्यामोदास् तद् इदम् अखिलं रागिणि जनेकरोत्य् अन्तः क्षोभं न तु विषयसंसर्गविमुखे ॥ ८९ ॥

2.92

तरुणीवेषोद्दीपितकामाविकसज्जातीपुष्पसुगन्धिः ।उन्नतपीनपयोधरभाराप्रावृट् तनुते कस्य न हर्षम् ॥ ९० ॥

2.93

वियदुपचितमेघं भूमयः कन्दलिन्योनवकुटजकदम्बामोदिनो गन्धवाहाः ।शिखिकुलकलकेकारावरम्या वनान्ताःसुखिनम् असुखिनं वा सर्वम् उत्कण्ठयन्ति ॥ ९१ ॥

2.94

उपरि घनं घनपटलंतिर्यग् गिरयो ऽपि नर्तितमयूराः ।क्षितिर् अपि कन्दलधवलादृष्टिं पथिकः क्व पातयति ॥ ९२ ॥

2.95

इतो विद्युद्वल्लीविलसितम् इतः केतकितरोःस्फुरन् गन्धः प्रोद्यज्जलदनिनदस्फूर्जितम् इतः ।इतः केकिक्रीडाकलकलरवः पक्ष्मलदृशांकथं यास्यन्त्य् एते विरहदिवसाः सम्भृतरसाः ॥ ९३ ॥

2.96

असूचिसञ्चारे तमसि नभसि प्रौढजलदध्वनिप्राज्ञंमन्ये पतति पृषतानां च निचये ।इदं सौदामिन्याः कनककमनीयं विलसितंमुदं च म्लानिं च प्रथयति पथि स्वैरसुदृशाम् ॥ ९४ ॥

2.97

आसारेण न हर्म्यतः प्रियतमैर् यातुं बहिः शक्यतेशीतोत्कम्पनिमित्तम् आयतदृशा गाढं समालिङ्ग्यते ।जाताः शीकरशीतलाश् च मरुतोर् अत्यन्तखेदच्छिदोधन्यानां बत दुर्दिनं सुदिनतां याति प्रियासङ्गमे ॥ ९५ ॥

2.98

अर्धं सुप्त्वा निशायाः सरभससुरतायाससन्नश्लथाङ्गप्रोद्भूतासह्यतृष्णो मधुमदनिरतो हर्म्यपृष्ठे विविक्ते । सम्भोगक्लान्तकान्ताशिथिलभुजलतावर्जितं कर्करीतोज्योत्स्नाभिन्नाच्छधारं पिबति न सलिलं शारदं मन्दपुण्यः ॥ ९६ ॥

2.99

हेमन्ते दधिदुग्धसर्पिर् अशना माञ्जिष्ठवासोभृतःकाश्मीरद्रवसान्द्रदिग्धवपुषश् छिन्ना विचित्रै रतैः । वृत्तोरुस्तनकामिनोजनकृताश्लेषा गृहाभ्यन्तरेताम्बूलीदलपूगपूरितमुखा धन्याः सुखं शेरते ॥ ९७ ॥

2.100

प्रदुयत्प्रौढप्रियङ्गुद्युतिभृति विकसत्कुन्दमाद्यद्द्विरेफेकाले प्रालेयवातप्रचलविलसितोदारमन्दारधाम्नि ।येषां नो कण्ठलग्ना क्षणम् अपि तुहिनक्षोददक्षा मृगाक्षीतेसाम् आयामयामा यमसदनसमा यामिनी याति यूनाम् ॥ ९८ ॥

2.101

चुम्बन्तो गण्डभित्तीर् अलकवति मुखे सीत्कृतान्य् आदधानावक्षःसूत्कञ्चुकेषु स्तनभरपुलकोद्भेदम् आपादयन्तः ।
ऊरूनाकम्पयन्तः पृथुजघनतटात् स्रंसयन्तो ऽंशुकानिव्यक्तं कान्ताजनानां विटचरितभृतः शैशिरा वान्ति वाताः ॥ ९९ ॥

2.102

केशानाकुलयन् दृशो मुकुलयन् वासो बलाद् आक्षिपन्नातन्वन्पुलकोद्गमं प्रकटयन् आवेगकम्पं शनैः ।बारं बारम् उदारसीत्कृतकृतो दन्तच्छदान् पीडयन्प्रायः शैशिर एष सम्प्रति मरुत् कान्तासु कान्तायते ॥ १०० ॥

2.103

यद्य् अस्य नास्ति रुचिरं तस्मिंस् तस्य स्पृहा मनोज्ञे ऽपि ।रमणीये ऽपि सुधांशौ न मनःकामः सरोजिन्याः ॥ १०१ ॥

2.104

वैराग्ये संचरत्य् एको नीतौ भ्रमति चापरः ।शृङ्गारे रमते कश्चिद् भुवि भेदाः परस्परम् ॥ १०२ ॥

2.105

इति शुभं भूयात् ।

3.head

वैराग्यशतकम्

3.1

चूडोत्तंसितचन्द्रचारुकलिकाचञ्चच्छिखाभास्वरोलीलादग्धविलोलकामशलभः श्रेयोदशाग्रे स्फुरन् ।
अन्तःस्फूर्जदपारमोहतिमिरप्राग्भारम् उच्चाटयन्श्चेतःसद्मनि योगिनां विजयते ज्ञानप्रदीपो हरः ॥ १ ॥

3.2

भ्रान्तं देशम् अनेकदुर्गविषमं प्राप्तं न किञ्चित् फलंत्यक्त्वा जातिकुलाभिमानम् उचितं सेवा कृता निष्फला ।भुक्तं मानविवर्जितं परगृहेष्व् आशङ्कया काकवत्तृष्णे जृम्भसि पापकर्मपिशुने नाद्यापि सन्तुष्यसि ॥ २ ॥

3.3

उत्खातं निधिशङ्कया क्षितितलं ध्माता गिरेर् धातवोनिस्तीर्णः सरितां पतिर् नृपतयो यत्नेन सन्तोषिताः ।मन्त्राराधनतत्परेण मनसा नीताः श्मशाने निशाःप्राप्तः काणवराटको ऽपि न मया तृष्णे सकामा भव ॥ ३ ॥

3.4

खलालापाः सौढाः कथम् अपि तदाराधनपरैर्निगृह्यान्तर्बाष्पं हसितम् अपि शून्येन मनसा ।कृतो वित्तस्तम्भप्रतिहतधियाम् अञ्जलिर् अपित्वम् आशे मोघाशे किम अपरम् अतो नर्तयसि माम् ॥ ४ ॥

3.5

अमीषां प्राणानां तुलितविसिनीपत्रपयसांकृते किं नास्माभिर् विगलितविवेकैर् व्यवसितम् ।यदाढ्यानाम् अग्रे द्रविणमदनिःसंज्ञमनसांकृतं मावव्रीडैर् निजगुणकथापातकम् अपि ॥ ५ ॥

3.6

क्षान्तं न क्षमया गृहोचितसुखं त्यक्तं न सन्तोषतःसोढो दुःसहशीततापपवनक्लेशो न तप्तं तपः ।ध्यातं वित्तम् अहर्निशं नित्यमितप्राणैर् न शम्भोः पदंतत्तत्कर्म कृतं यद् एव मुनिभिस् तैस् तैः फलैर् वञ्चिताः ॥ ६ ॥

3.7

भोगा न भुक्ता वयम् एव भुक्तास्तपो न तप्तं वयम् एव तप्ताः ।कालो न यातो वयम् एव यातास्तृष्णान जीर्णा वयम् एव जीर्णाः ॥ ७ ॥

3.8

बलिभिर् मुखम् आक्रान्तं पलितेनाङ्कितं शिरः ।गात्राणि शिथिलायन्ते तृष्णैका तरुणायते ॥ ८ ॥

3.9

विवेकव्याकोशे विदधति समे शाम्यति तृषापरिष्वङ्गे तुङ्गे प्रसरतितरां सा परिणता ।
जराजीर्णैश्वर्यग्रसनगहनाक्षेपकृपणस्तृषापात्रंयस्यां भवति मरुताम् अप्य् अधिपतिः ॥ ८*१ ॥

3.10

निवृत्ता भोगेच्छा पुरुषबहुमानो ऽपि गलितःसमानाः स्वर्याताः सपदि सुहृदो जीवितसमाः ।शनैर् यष्ट्य् उत्थानं घनतिमिररुद्धे च नयनेअहो मूढः कायस् तद् अपि मरणापायचकितः ॥ ९ ॥

3.11

आशा नाम नदी मनोरथजला तृष्णातरङ्गाकुलारागग्राहवती वितर्कविहगा धैर्यद्रुमध्वंसिनी ।मोहावर्तसुदुस्तरातिगहना प्रोत्तुङ्गचिन्तातटीतस्याः परगता विशुद्धम् अलसो नन्दन्ति योगीश्वराः ॥ १० ॥

3.12

न संसारोत्पन्नं चरितम् अनुपश्यामि कुशलंविपाकः पुण्यानां जनयति भयं मे विमृशतः ।महद्भिः पुण्यौघैश् चिरपरिगृहीताश् च विषयामहान्तो जायन्ते व्यसनम् इव दातुं विषयिणाम् ॥ ११ ॥

3.13

अवश्यं यातारश् चिरतरम् उषित्वापि विषयावियोगे को भेदस् त्यजति न जनो यत् स्वयम् अमून् ।व्रजन्तः स्वातन्त्र्याद् अतुलपरितापाय मनसःस्वयं त्यक्ता ह्य् एते शमसुखम् अनन्तं विदधति ॥ १२ ॥

3.14

ब्रह्मज्ञानविवेकनिर्मलधियः कुर्वन्त्य् अहो दुष्करंयन् मुञ्चन्त्य् उपभोगभाञ्ज्य् अपि धनान्य् एकान्ततो निःस्पृहाः ।सम्प्रातान् न पुरा न सम्प्रति न च प्राप्तौ दृढप्रत्ययान्वाञ्छामात्रपरिग्रहान् अपि परं त्यक्तुं न शक्ता वयम् ॥ १३ ॥

3.15

धन्यानां गिरिकन्दरेषु वसतां ज्योतिः परं ध्यायतामानन्दाश्रुजलं पिबन्ति शकुना निःशङ्कम् अङ्केशयाः ।अस्माकं तु मनोरथोपरचितप्रासादवापीतटक्रीडाकाननकेलिकौतुकजुषाम् आयुः परं क्षीयते ॥ १४ ॥

3.16

भिक्षाशतं तद् अपि नीरसम् एकबारंशय्या च भूः परिजनो निजदेहमात्रम् ।वस्त्रं विशीर्णशतखण्डमयी च कन्थाहा हा तथापि विषया न परित्यजन्ति ॥ १५ ॥

3.17

स्तनौ मांसग्रन्थी कनककलशाव् इत्य् उपमितीमुखं श्लेष्मागारं तद् अपि च शशाङ्केन तुलितम् ।स्रवन्मूत्रक्लिन्नं करिवरशिरस्पर्धि जघनंमुहुर् निन्द्यं रूपं कविजनविशेषैर् गुरुकृतम् ॥ १६ ॥

3.18

एको रागिषु राजते प्रियतमादेहार्धहारी हरोनीरागेषु जनो विमुक्तललनासङ्गो न यस्मात् परः ।दुर्वारस्मरबाणपन्नगविषव्याबिद्धमुग्धो जनःशेषः कामविडम्बितान् न विषयान् भोक्तुं न मोक्तुं क्षमः ॥ १७ ॥

3.19

अजानन् दाहात्म्यं पततु शलभस् तीव्रदहनेस मीनो ऽप्य् अज्ञानाद् बडिशयुतम् अश्नातु पिशितम् ।विजानन्तो ऽप्य् एते वयम् इह वियज् जालजटिलान्न मुञ्चामः कानाम् अहह गहनो मोहमहिमा ॥ १८ ॥

3.20

तृषा शुष्यत्य् आस्ये पिबति सलिलं शीतमधुरंक्षुधार्तः शाल्यन्नं कवलयति मांसादिकलितम् ।प्रदीप्ते कामाग्नौ सुदृढतरम् आलिङ्गति वधूंप्रतीकारं व्याधः सुखम् इति विपर्यस्यति जनः ॥ १९ ॥

3.21

तुङ्गं वेश्म सुताः सताम् अभिमताः सङ्ख्यातिगाः सम्पदःकल्याणी दयिता वयश् च नवम् इत्य् अज्ञानमूढो जनः ।मत्वा विश्वम् अनश्वरं निविशते संसारकारागृहेसंदृश्य क्षणभङ्गुरं तद् अखिलं धन्यस् तु सन्न्यस्यति ॥ २० ॥

3.22

दीना दीनमुखैः सदैव शिशुकैराकृष्टजीर्णाम्बराक्रोशद्भिः क्षुधितैर् निरन्नविधुरा दृश्या न चेद् गेहिनी ।याच्ञाभङ्गभयेन गद्गदगलत्रुट्यद्विलीनाक्षरंको देहीति वदेत् स्वदग्धजठरस्यार्थे मनस्वी पुमान् ॥ २१ ॥

3.23

अभिमतमहामानग्रन्थिप्रभेदपटीयसीगुरुतरगुणग्रामाभोजस्फुटोज्ज्वलचन्द्रिका ।
विपुलविलल्लज्जावल्लीवितानकुठारिकाजठरपिठरी दुस्पुरेयं करोति विडम्बनम् ॥ २२ ॥

3.24

पुण्ये ग्रामे वने वा महति सितपटच्छन्नपाली कपालिंह्य् आदाय न्यायगर्भद्विजहुतहुतभुग् धूमधूम्रोपकण्ठे ।द्वारं द्वारं प्रविष्टो वरम् उदरदरीपूरणाय क्षुधार्तोमानी प्राणैः सनाथो न पुनर् अनुदिनं तुल्यकुल्येसु दीनः ॥ २३ ॥

3.25

गङ्गातरङ्गकणशीकरशीतलानिविद्याधराध्युषितचारुशिलातलानि ।स्थानानि किं हिमवतः प्रलयं गतानियत् सावमानपरपिण्डरता मनुष्याः ॥ २४ ॥

3.26

किं कन्दाः कन्दरेभ्यः प्रलयम् उपगता निर्झरा वा गिरिभ्यःप्रध्वस्ता वा तरुभ्यः सरसगलभृतो वल्कलिन्यश् च शाखाः ।वीक्ष्यन्ते यन् मुखानि प्रसभम् अपगतप्रश्रयाणां खलानांदुःखाप्तस्वल्पवित्तस्मयपवनवशानर्तितभ्रूलतानि ॥ २५ ॥

3.27

पुण्यैर् मूलफलैस् तथा प्रणयिनीं वृत्तिं कुरुष्वाधुनाभूशय्यां नवपल्लवैर् अकृपणैर् उत्तिष्ठ यावो वनम् ।क्षुद्राणाम् अविवेकमूढमनसां यत्रेश्वराणां सदावित्तव्याधिविकारविह्वलगिरां नामापि न श्रूयते ॥ २६ ॥

3.28

फलं स्वेच्छालभ्यं प्रतिवनम् अखेदं क्षितिरुहांपयः स्थाने स्थाने शिशिरमधुरं पुण्यसरिताम् ।मृदुस्पर्शा शय्या सुललितलतापल्लवमयीसहन्ते सन्तापं तद् अपि धनिनां द्वारि कृपणाः ॥ २७ ॥

3.29

ये वर्तन्ते धनपतिपुरः प्रार्थनादुःखभाजोये चाल्पत्वं दधति विषयाक्षेपपर्याप्तबुद्धेः ।तेषाम् अन्तःस्फुरितहसितं वासराणि स्मरेयंध्यानच्छेदे शिखरिकुहरग्रावशय्यानिषण्णः ॥ २८ ॥

3.30

ये सन्तोषनिरन्तरप्रमुदितस् तेषां न भिन्ना मुदोये त्व् अन्ये धनलुब्धसङ्कलधियस् तेसां न तृष्णाहता ।इत्थं कस्य कृते कुतः स विधिना कीदृक्पदं सम्पदांस्वात्मन्य् एव समाप्तहेममहिमा मेरुर् न मे रोचते ॥ २९ ॥

3.31

भिक्षाहारम् अदैन्यम् अप्रतिसुखं भीतिच्छिदं सर्वतोदुर्मात्सर्यमदाभिमानमथनं दुःखौघविध्वंसनम् ।सर्वत्रान्वहम् अप्रयत्नसुलभं साधुप्रियं पावनंशम्भोः सत्रम् अवायम् अक्षयनिधिं शंसन्ति योगीश्वराः ॥ ३० ॥

3.32

भोगे रोगमयं कुले च्युतिभयं वित्ते नृपालाद् भयंमाने धैन्यभयं बले रिपुभयं रूपे जराय भयम् ।शास्त्रे वादिभयं गुणे खलभयं काये कृतान्ताद् भयंसर्वं वस्तु भयान्वितं भुवि नृणां वैराग्यम् एवाभयम् ॥ ३१ ॥

3.33

आक्रान्तं मरणेन जन्म जरसा चात्युज्ज्वलं यौवनंसन्तोषो धनलिप्सया शममुखं प्रौढाङ्गनाविभ्रमैः ।लोकैर् मत्सरिभिर् गुणा वनभुवो व्यालैर् नृपा दुर्जनैर्अस्थैर्येण विभूतयो ऽप्य् अपहता ग्रस्तं न किं केन वा ॥ ३२ ॥

3.34

आधिव्याधिशतैर् जनस्य विविधैर् आरोग्यम् उन्मूल्यतेलक्ष्मीर् यत्र पतन्ति तत्र विवृतद्वारा इव व्यापदः ।जातं जातम् अवश्यम् आशु विवशं मृत्युः करोत्य् आत्मसात्तत् किं तेन निरङ्कुशेन विधिना यन् निर्मितं सुस्थिरम् ॥ ३३ ॥

3.35

भोगास् तुङ्गतरङ्गभङ्गतरलाः प्राणाः क्षणध्वंसिनःस्तोकान्य् एव दिनानि यौवनसुखं स्फूर्तिः प्रियासु स्थिता ।तत्संसारम् असारम् एव निखिलं बुद्ध्वा बुधा बोधकालोकानुग्रहपेशलेन मनसा यत्नः समाधीयताम् ॥ ३४ ॥

3.36

भोगा मेघवितानमध्यविलसत्सौदामिनीचञ्चलाआयुर् वायुविघट्टिताब्जपटलीलीनाम्बुवद् भङ्गुरम् ।लीला यौवनलालसास् तनुभृताम् इत्य् आकलय्य द्रुतंयोगे धैर्यसमाधिसिद्धिसुलभे बुद्धिं विदध्वं बुधाः ॥ ३५ ॥

3.37

आयुः कल्लोललोलं कतिपयदिवसस्थायिनी यौवनश्रीर्अर्थाः सङ्कल्पकल्पा घनसमयतडिद्विभ्रमा भोगपूगाः ।कण्ठाश्लेषोपगूढ तद् अपि च न चिरं यत् प्रियाभः प्रणीतंब्रह्मण्य् आसक्तचित्ता भवत भवमयाम्भोधिपारं तरीतुम् ॥ ३६ ॥

3.38

कृच्छ्रेणामेध्यमध्ये नियमिततनुभिः स्थीयते गर्भवासेकान्ताविश्लेषदुःखव्यतिकरविषमो यौवने चोपभोगः ।वामाक्षीणाम् अवज्ञाविहसितवसतिर् वृद्धभावो ऽन्यसाधुःसंसारे रे मनुष्या वदत यदि सुखं स्वल्पम् अप्य् अस्ति किञ्चित् ॥ ३७ ॥

3.39

व्याघ्रीव तिष्ठति जरा परितर्जयन्तीरोगाश् च शत्रव इव प्रहरन्ति देहम् ।आयुः परिस्रवन्ति भिन्नघटादिवाम्भोलोकस् तथाप्य् अहितम् आचरतीति चित्रम् ॥ ३८ ॥

3.40

भोगा भङ्गुरवृत्तयो बहुविधास् तैर् एव चायं भवस्तत्कस्येह कृते परिभ्रमत रे लोकाः कृतं चेष्टतैः ।आशापाशशतापशान्तिविशदं चेतःसमाधीयतांकामोत्पत्तिवशात् स्वधामनि यदि श्रद्देयम् अस्मद्वचः ॥ ३९ ॥

3.41

सखे धन्याः केचित् त्रुटितभवबन्धव्यतिकरावनान्ते चित्तान्तर्विषम् अविषयाशीत्विषगताः ।
शरच्चन्द्रज्योत्स्नाधवलगगनाभोगसुभगांनयन्ते ये रात्रिं सुकृतचयचिन्तैकशरणाः ॥ ३९*१ ॥

3.42

ब्रह्मेन्द्रादिमरुद्गणांस् तृणकणान् यत्र स्थितो मन्यतेयत्स्वादाद् विरसा भवन्ति विभवास् त्रैलोक्यराज्यादयः ।भोगः को ऽपि स एव एक परमो नित्योदितो जृम्भतेभोः साधो क्षणभङ्गुरे तद् इतरे भोगे रतिं मा कृथाः ॥ ४० ॥

3.43

सा रम्या नगरी महान् स नृपतिः सामन्तचक्रं च तत्पार्श्वे तस्य च सा विदग्धपरिषत् ताश् चन्द्रबिम्बाननाः ।उद्वृत्तः स राजपुत्रनिवहस् ते वन्दिनस् ताः कथाःसर्वं यस्य वशाद् अगात् स्मृतिपथं कालाय तस्मै नमः ॥ ४१ ॥

3.44

यत्रानेकः क्वचिद् अपि गृहे तत्र तिष्ठत्य् अथैकोयत्राप्य् एकस् तद् अनु बहवस् तत्र नैको ऽपि चान्ते ।इत्थं नयौ रजनिदिवसौ लोलयन् द्वाव् इवाक्षौकालः कल्यो भुवनफलके क्रडति प्राणिशारैः ॥ ४२ ॥

3.45

आदित्यस्य गतागतैर् अहरहः संक्षीयते जीवितंव्यापारैर् बहुकार्यभारगुरुभिः कालो ऽपि न ज्ञायते ।दृष्ट्वा जन्मजराविपत्तिमरणं त्रासश् च नोत्पद्यतेपीत्वा मोहमयीं प्रमादमदिराम् उन्मत्तभूतं जगत् ॥ ४३ ॥

3.46

रात्रिः सैव पुनः स एव दिवसो मत्वा मुधा जन्तवोधावन्त्य् उद्यमिनस् तथैव निभृतप्रारब्धतत्तत्क्रियाः ।व्यापारैः पुनरुक्तभूतविषयैर् इत्थं विधेनामुनासंसारेण कदर्थिता वयम् अहो मोहान् न लज्जामहे ॥ ४४ ॥

3.47

न ध्यानं पदम् ईश्वरस्य विधिवत् संसारविच्छित्तयेस्वर्गद्वारकपाटपाटनपटुर् धर्मो ऽपि नोपार्जितः ।नारीपीनपयोधरोरुयुगलं स्वप्ने ऽपि नालिङ्गितंमातुः केवलम् एव यौवनवनच्छेदे कुठारा वयम् ॥ ४५ ॥

3.48

नाभ्यस्ता प्रतिवादिवृन्ददमनी विद्या विनीतोचिताखड्गाग्रैः करिकुम्भपीठदलनैर् नाकं न नीतं यशः ।कान्ताकोमलपल्लवाधररसः पीतो न चन्द्रोदयेतारुण्यं गतम् एव निष्फलम् अहो शून्यालये दीपवत् ॥ ४६ ॥

3.49

विद्या नाधिगता कलङ्करहिता वित्तं च नोपार्जितंशुश्रूषापि समाहितेन मनसा पित्रोर् न सम्पादिता ।आलोलायतलोचनाः प्रियतमाः स्वप्ने ऽपि नालिङ्गिताःकालो ऽयं परपिण्डलोलुपतया काकैर् इव प्रेर्यते ॥ ४७ ॥

3.50

वयं येभ्यो जाताश् चिरपरिगता एव खलु तेसमं यैः संवृद्धाः स्मृतिविषयतां ते ऽपि गमिताः ।इदानीम् एते स्मः प्रतिदिवसम् आसन्नपतनागतास् तुल्यावस्थां सिकतिलनदीतीरतरुभिः ॥ ४८ ॥

3.51

आयुर् वर्षशतं नृणां परिमितं रात्रौ तदर्धं गतंतस्यार्धस्य परस्य चार्धम् अपरं बालत्ववृद्धत्वयोः ।शेषं व्याधिवियोगदुःखसहितं सेवादिभिर् नीयतेजीवे वारितरङ्गचञ्चलतरे सौख्यं कुतः प्राणिनाम् ॥ ४९ ॥

3.52

क्षणं बालो भूत्वा क्षणम् पै युवा कामरसिकःक्षणं वित्तैर् हीनः क्षणम् अपि च सम्पूर्णविभवः ।जराजीर्णैर् अङ्गैर् नट इव बलीमण्डिततनूर्नरः संसारान्ते विशति यमधानीयवनिकाम् ॥ ५० ॥

3.53

त्वं राजा वयम् अप्य् उपासितगुरुप्रज्ञाभिमानोन्नताःख्यातस् त्वं विभवैर् यशांसि कवयो दिक्षु प्रतन्वन्ति नः ।इत्थं मानधनातिदूरम् उभयोर् अप्य् आवयोर् अन्तरंयद्य् अस्मासु पराङ्मुखो ऽसि वयम् अप्य् एकान्ततो निःस्पृहा ॥ ५१ ॥

3.54

अर्थानाम् ईशिषे त्वं वयम् अपि च गिराम् ईश्महे यावद् अर्थंशूरस् त्वं वादिदर्पव्युपशमनविधावक्षयं पाटवं नः ।सेवन्ते त्वां धनाढ्या मतिमलहतयेमाम् अपि श्रोतुकामामय्य्अप्य् आस्था न ते चेत् त्वयि मम नितराम् एव राजन्न् अनास्था ॥ ५२ ॥

3.55

वयम् इह परितुष्टा वल्कलैस् त्वं दुकूलैःसम इह परितोषो निर्विशेषो विशेषः ।स तु भवतु दरिद्रो यस्य तृष्णा विशालामनसि च परितुष्टे को ऽर्थवान् को दरिद्रः ॥ ५३ ॥

3.56

फलम् अलम् अशनाय स्वादु पानाय तोयंक्षितिर् अपि शयनार्थं वाससे वल्कलं च ।
नवघनमधुपानभ्रान्तसर्वेन्द्रियाणामविनयम्अनुमन्तुं नोत्सहे दुर्जनानाम् ॥ ५४ ॥

3.57

अश्नीमहि वयं भिक्षाम् आशावासो वसीमहि ।शयीमहि महीपृष्ठे कुर्वीमहि किम् ईश्वरैः ॥ ५५ ॥

3.58

न नटा ना विटा न गायका न च सभ्येतरवादचुञ्चवः ।नृपम् ईक्षितुम् अत्र के वयं स्तनभारान् अमिता न योषितः ॥ ५६ ॥

3.59

विपुलहृदयैर् ईशैर् एतज् जगज् जनितं पुराविधृतम् अपरैर् दत्तं चान्यैर् विजित्य तृणं यथा ।इह हि भुवनान्य् अन्यैर् धीराश् चतुर्दश भुञ्जतेकतिपयपुरस्वाम्ये पुंसां क एष मदज्वरः ॥ ५७ ॥

3.60

अभुक्तायां यस्यां क्षणम् अपि न यातं नृपशतैर्धुवस् तस्या लाभे क इव बहुमानः क्षितिभृताम् ।तदंशस्याप्य् अंशे तदवयलेशे ऽपि पतयोविषादे कर्तव्ये विदधति जडाः प्रत्युत मुदम् ॥ ५८ ॥

3.61

मृत्पिण्डो जलरेखया बलयतिः सर्वो ऽप्य् अयं नन्व् अणुःस्वांशीकृत्य स एव सङ्गरशतै राज्ञां गणा भुञ्जते ।ये दद्युर् ददतो ऽथवा किम् अपरं क्षुद्रा दरिद्रं भृशंधिग् धिक् तान् पुरुषाधमान् धनकणान् वाञ्छन्ति तेभ्यो ऽपि ये ॥ ५९ ॥

3.62

स जातः को ऽप्य् आसीन् मदनरिपुणा मूर्ध्नि धवलंकपालं यस्योच्चैर् विनिहितम् अलङ्कारविधये ।नृभिः प्राणत्राणप्रवणमतिभिः कैश्चिद् अधुनानमद्भिः कः पुंसाम् अयम् अतुलदर्पज्वरभरः ॥ ६० ॥

3.63

परेषां चेतांसि प्रतिदिवसम् आराध्य बहुधाप्रसादं किं नेतुं विशसि हृदय क्लेशकलितम् ।प्रसन्ने त्वय्य् अन्तःसवयमुदितचिन्तामणिगणोविविक्तः सङ्कल्पः किम् अभिलषितं पुष्यति न ते ॥ ६१ ॥

3.64

सत्याम् एव त्रिलोकीसरिति हरशिरश् चुम्बिनीवच् छटायांसद्वृत्तिं कल्पयन्त्यां बटविटपभवैर् वल्कलैः सत्फलैश् च ।को ऽयं विद्वान् विपत्तिज्वरजनितरुजातीवदुःखासिकानांवक्त्रं वीक्षेत दुःस्थे यदि हि न विभृयात् स्वे कुटुम्बे ऽनुकम्पाम् ॥ ६१*१ ॥

3.65

परिभ्रमसि किं मुधा क्वचन चित्त विश्राम्यतांस्वयं भवति यद् यथा भवति तत् तथा नान्यथा ।अतीतम् अननुस्मरन्न् अपि च भाव्यसङ्कल्पयन्नतर्कितसमागमानुभवामि भोगनाहम् ॥ ६२ ॥

3.66

एतस्माद् विरमेन्द्रियार्थगहनादायासकाद् आश्रयश्रेयोमार्गम् अशेषदुःखशमनव्यापारदक्षं क्षणात् ।स्वात्मीभावम् उपैहि सन्त्यज निजां कल्लोललोलं गतिंमा भूयो भज भङ्गुरां भवरतिं चेतः प्रसीदाधुना ॥ ६३ ॥

3.67

मोहं मार्जय ताम् उपार्जय रतिं चन्द्रार्धचूडामणौचेतः स्वर्गतरङ्गिणीतटभुवाम् आसङ्गम् अङ्गीकुरु ।को वा वीचिषु बुद्बुदेषु च तडिल्लेखासु च श्रीषु चज्वालाग्रेषु च पन्नगेषु सरिद्वेगेषु च चप्रत्ययः ॥ ६४ ॥

3.68

चेतश् चिन्तय मा रमां सकृद् इमाम् अस्थायिनीम् आस्थयाभूपालभ्रुकुटीकुटीविहरणव्यापारपण्याङ्गनाम् ।कन्थाकञ्चुकिनः प्रविश्य भवनद्वाराणि वाराणसीरथ्यापङ्क्तिषु पाणिपात्रपतितां भिक्षाम् अपेक्षामहे ॥ ६५ ॥

3.69

अग्रे गीतं सरसकवयः पार्श्वयोर् दाक्षिणात्याःपश्चाल् लीलावलयरणितं चामरग्राहिणीनाम् ।यद्य् अस्त्य् एवं कुरु भवरसास्वादने लम्पटत्वंनो चेच् चेतः प्रविश सहसा निर्विकल्पे समाधौ ॥ ६६ ॥

3.70

प्राप्ताः श्रियः सकलकामदुधास् ततः किंन्यस्तं पदं शिरसि विद्विषतां ततः किम् ।सम्पादिताः प्रणयिनो विभवैस् ततः किंकल्पं स्थितास् तनुभृतां तनवस् ततः किम् ॥ ६७ ॥

3.71

भक्तिर् भवे मरणजन्मभयं हृदिस्थंस्नेहो न बन्धुषु न मन्मथजा विकाराः ।संसर्ज दोषरहिता विजया वनान्तावैराग्यम् अस्ति किम् इतः परमर्थनीयम् ॥ ६८ ॥

3.72

तस्माद् अनन्तम् अजरं परमं विकासितद् ब्रह्म चिन्तय किम् एभिर् असद्विकल्पैः ।यस्यानुषङ्गिण इमे भुवनाधिपत्यभोगादयःकृपणलोकमता भवन्ति ॥ ६९ ॥

3.73

पातालम् आविशसि यासि नभो विलङ्घ्यदिङ्मण्डलं भ्रमसि मानस चापलेन ।भ्रान्त्यापि जातु विमलं कथम् आत्मनीनंन ब्रह्म संसरसि विर्वृतिम्म् एषि येन ॥ ७० ॥

3.74

किं वेदैः स्मृतिभिः पुराणपठनैः शास्त्रैर् महाविस्तरैःस्वर्गग्रामकुटीनिवासफलदैः कर्मक्रियाविभ्रमैः ।मुक्त्वैकं भवदुःखभाररचनाविध्वंसकालानलंस्वात्मानन्दपदप्रवेशकलनं शेसैर् वाणिग्वृत्तिभिः ॥ ७१ ॥

3.75

नायं ते समयो रहस्यम् अधुना निद्राति नाथो यदिस्थित्वा द्रक्ष्यति कुप्यति प्रभुर् इति द्वारेषु येषां वचः ।चेतस् तान् अपहाय याहि भवनं देवस्य विश्वेशितुर्निर्दौवारिकनिर्दयोक्त्यपरुषं निःसोमशर्मप्रदम् ॥ ७१*१ ॥

3.76

यतो मेरुः श्रीमान् निपतति युगान्ताग्निवलितःसमुद्राः शुष्यन्ति प्रचुरमकरग्राहनिलयाः ।धरा गच्छत्य् अन्तं धरणिधरपादैर् अपि धृताशरीरे का वार्ता करिकलभकर्णाग्रचपले ॥ ७२ ॥

3.77

गात्रं सङ्कुचितं गतिर् विगलिता भ्रष्टा च दन्तावलिर्दृष्टिर् नक्ष्यति वर्धते वधिरता वक्त्रं च लालायते ।वाक्यं नाद्रियते च बान्धवजनो भार्या न शुश्रूषतेहा कष्टं पुरुषस्य जीर्णवयसः पुत्रो ऽप्य् अमित्रायते ॥ ७३ ॥

3.78

वर्णं सितं शिरसि वीक्ष्य शिरोरुहाणांस्थानं जरापरिभवस्य तदा पुमांसम् ।आरोपितांस्थिशतकं परिहृत्य यान्तिचण्डालकूपम् इव दूरतरं तरुण्यः ॥ ७४ ॥

3.79

यावत् स्वस्थम् इदं शरीरम् अरुजं यावच् च दूरे जरायावच् चेन्द्रियशक्तिर् अप्रतिहता यावत् क्षयो नायुषः ।आत्मश्रेयसि तावद् एव विदुषा कार्यः प्रयत्नो महान्सन्दीप्ते भवने तु कूपखननं प्रत्युद्यमः कीदृशः ॥ ७५ ॥

3.80

तपस्यन्तः सन्तः किम् अधिनिवसामः सुरनदींगुणोदारान् दारान् उत परिचरामः सविनयम् ।पिबामः शास्त्रौघानुतविविधकाव्यामृतरसान्न विद्मः किं कुर्मः कतिपयनिमेषायुषि जने ॥ ७६ ॥

3.81

दुराराध्याश् चामी तुरगचलचित्ताः क्षितिभुजोवयं तु स्थूलेच्छाः सुमहति फले बद्धमनसः ।जरा देहं मृत्युर् हरति दयितं जीवितम् इदंसखे नान्यच् छ्रेयो जगति विदुषे ऽन्यत्र तपसः ॥ ७७ ॥

3.82

माने म्लायिनि खण्डिते च वसुनि व्यर्थे प्रयाते ऽर्थिनिक्षीणे बन्धुजने गते परिजने नष्टे शनैर् यौवने ।युक्तं केवलम् एतद् एव सुधियां यज् जह्नुकन्यापयःपूताग्रावगिरीन्द्रकन्दरतटीकुञ्जे निवासः क्वचित् ॥ ७८ ॥

3.83

रम्याश् चन्द्रमरीचयस् तृणवती रम्या वनान्तस्थलीरम्यं साधुसमागमागतसुखं काव्येषु रम्याः कथाः ।कोपोपाहितबाष्पबिन्दुतरलं रम्यं प्रियाया मुखंसर्वं रम्यम् अनित्यताम् उपगते चित्ते न किञ्चित् पुनः ॥ ७९ ॥

3.84

रम्यं हर्म्यतलं न किं वसतये श्रव्यं न गेयादिकंकिं वा प्राणसमासमागमसुखं नैवाधिकप्रीतये ।किन्तु भ्रान्तपतङ्गक्षपवनव्यालोलदीपाङ्कुरच्छायाचञ्चलम् आकलय्य सकलं सन्तो वनान्तं गताः ॥ ८० ॥

3.85

आ संसारात् त्रिभुवनम् इदं चिन्वतां तात् तादृङ्नैवास्माकंनयनपदवीं श्रोत्रमार्गं गतो वा ।यो ऽयं धत्ते विषयकरिणो गाढगूढाभिमानक्षीवस्यान्तःकरणकरिणः संयमालानलीलाम् ॥ ८१ ॥

3.86

यद् एतत् स्वच्छन्दं विहरणम् अकार्पण्यम् अशनंसहार्यैः संवासः श्रुतम् उपशमैकव्रतफलम् ।मनो मन्दस्पन्दं बहिर् अपि चिरस्यापि विमृशन्नजाने कस्यैषा परिणतिर् उदारस्य तपसः ॥ ८२ ॥

3.87

जीर्णा एव मनोरथाश् च हृदये यातं च तद् यौवनंहन्ताङ्गेषु गुणाश् बन्ध्यफलतां याता गुणज्ञैर् विना ।किं युक्तं सहसाभ्युपैति बलवान् कालः कृतान्तो ऽक्षमीहा ज्ञातं मदनान्तकाङ्घ्रियुगलं मुक्त्वास्ति नान्यो गतिः ॥ ८३ ॥

3.88

महेश्वरे वा जगताम् अधीश्वरेजनार्दने वा जगदन्तरात्मनि ।न वस्तुभेदप्रतिपत्तिर् अस्ति मेतथापि भक्तिस् तरुणेन्दुशेखरे ॥ ८४ ॥

3.89

स्फुरत्स्फारज्योत्स्नाधवलिततले क्वापि पुलिनेसुखासीनाः शान्तध्वन्तिसु रजनीषु द्युसरितः ।भवाभोगोद्विग्नाः शिव शिव शिवेत्य् उच्चवचसःकदा यास्यामो ऽतर्गतबहुलबाष्पाकुलदशाम् ॥ ८५ ॥

3.90

महादेवो देवः सरिद् अपि च सैषा सुरसरिद्गुहाएवागारं वसनम् अपि ता एव हरितः ।सुहृदा कालो ऽयं व्रत्म् इदम् अदैन्यव्रतम् इदंकियद् वा वक्ष्यामो वटविटप एवास्तु दयिता ॥ ॥

3.91

वितीर्णे सर्वस्वे तरुणकरुणापूर्णहृदयाःस्मरन्तः संसारे विगुणपरिणामां विधिगतिम् ।वयं पुण्यारण्ये परिणतशरच्चन्द्रकिरणास्त्रियामा नेस्यामो हरचरणचिन्तैकशरणाः ॥ ८६ ॥

3.92

कदा वाराणस्याम् अमरतटिनीरोधसि वसन्वसानः कौपीनं शिरसि निदधानो ऽञ्जलिपुटम् ।अये गौरीनाथ त्रिपुरहर शम्भो त्रिनयनप्रसीदेत्याक्रोशन् निमिषम् इव नेष्यामि दिवसान् ॥ ८७ ॥

3.93

उद्यानेषु विचित्रभोजनविधिस् तीव्रातितीव्रं तपःकौपीनावरणं सुवस्त्रम् अमितं भिक्षाटनं मण्डनम् ।आसन्नं मरणं च मङ्गलसमं यस्यां समुत्पद्यतेतां काशीं परिहृत्य हन्त विबुधैर् अन्यत्र किं स्थीयते ॥ ॥

3.94

स्नात्वा गाङ्गैः पयोभिः शुचिकुसुमफलैर् अर्चयित्वा विभो त्वाध्येये ध्यानं निवेश्य क्षितिधरकुहरग्रावपर्यङ्कमूले ।आत्मारामः फलाशी गुरुवचनरतस् त्वत्प्रसादात् स्मरारेदुःखं मोक्ष्ये कदाहं समकरचरणे पुंसि सेवासमुत्थम् ॥ ८८ ॥

3.95

एकाकी निःस्पृहः शान्तः पाणिपात्रो दिगम्बरः ।कदा शम्भो भविष्यामि कर्मनिर्मूलनक्षमः ॥ ८९ ॥

3.96

पाणिं पात्रयतां निसर्गशुचिना भैक्षेण सन्तुष्यतांयत्र क्वापि निषीदतां बहुतृणं विश्वं मुहुः पश्यताम् ।अत्यागे ऽपि तनोर् अखण्डपरमानन्दावबोधस्पृशामध्वा को ऽपि शिवप्रसादसुलभः सम्पत्स्यते योगिनाम् ॥ ९० ॥

3.97

कौपीनं शतखण्डजर्जरतरं कन्था पुनस् तादृशीनैश्चिन्त्यं निरपेक्षभैक्ष्यम् अशनं निद्रा श्मशाने वने ।स्वातन्त्र्येण निरङ्कुशं विहरणं स्वान्तं प्रशान्तं सदास्थैर्यं योगमहोत्सवे ऽपि च यदि त्रैलोक्यराज्येन किम् ॥ ९१ ॥

3.98

ब्रह्माण्डं मण्डलीमात्रं किं लोभाय मनस्विनः ।शफरीस्फुर्तेनाब्धिः क्षुब्धो न खलु जायते ॥ ९२ ॥

3.99

मातर् लक्ष्मि भजस्व कञ्चिद् अपरं मत्काङ्क्षिणी मा स्म भूर्भोगेषु स्पृहयालवस् तव वशे का निःस्पृहाणाम् असि ।सद्यः स्यूतपलाशपत्रपुटिकापात्रैः पवित्रीकृतैर्भिक्षावस्तुभिर् एव सम्प्रति वयं वृत्तिं समीहामहे ॥ ९३ ॥

3.100

महाशय्या पृथ्वी विपुलम् उपधानं भुजलतांवितानं चाकाशं व्यजनम् अनुकूलो ऽयम् अनिलः ।शरच्चन्द्रो दीपो विरतिवनितासङ्गमुदितःसुखी शान्तः शेते मुनिर् अतनुभूतिर् नृप इव ॥ ९४ ॥

3.101

भिक्षासी जनमध्यसङ्गरहितः स्वायत्तचेष्टः सदाहानादानविरक्तमार्गनिरतः कश्चित् तपस्वी स्थितः ।रथ्याकीर्णविशीर्णजीर्णवसनः सम्प्राप्तकन्थासनोनिर्मानो निरहङ्कृतिः शमसुखाभोगैकबद्धस्पृहः ॥ ९५ ॥

3.102

चण्डालः किम् अयं द्विजातिर् अथवा शूद्रो ऽथ किं तापसःकिं वा तत्त्वविवेकपेशलमतिर् योगीश्वरः को ऽपि किम् ।इत्य् उत्पन्नविकल्पजल्पमुखरैर् आभाष्यमाणा जनैर्न क्रुद्धाः पथि नैव तुष्टमनसो यान्ति स्वयं योगिनः ॥ ९६ ॥

3.103

हिंसाशून्यम् अयत्नलभ्यम् अशनं धात्रा मरुत्कल्पितंव्यालानं पशवस् तृणाङ्कुरभुजस् तुष्टाः स्थलीशायिनः । संसारार्णवलङ्घनक्षमधियां वृत्तिः कृता सा नृणांताम् अन्वेषयतां प्रयान्ति सततं सर्वं समाप्तिं गुणाः ॥ ९७ ॥

3.104

गङ्गातीरे हिमगिरिशिलाबद्धपद्मासनस्यब्रह्मध्यानाभ्यसनविधिना योगनिद्रां गतस्य ।किं तैर् भाव्यं मम सुदिवसैर् यत्र ते निर्विशङ्काःकण्डूयन्ते जरठहरिणाः स्वाङ्गम् अङ्गे मदीये ॥ ९८ ॥

3.105

जीर्णाः कन्था ततः किं सितम् अमलपटं पट्टसूत्रं ततः किंएका भार्या ततः किं हयकरिसुगणैर् आवृतो वा ततः किम् ।भक्तं भुक्तं ततः किं कदशनम् अथवा वासरान्ते ततः किंव्यक्तज्योतिर् न वान्तर्मथितभवभयं वैभवं वा ततः किम् ॥ ॥

3.106

पाणिः पात्रं पवित्रं भ्रमणपरिगतं भैक्ष्यम् अक्षय्यम् अन्नंविस्तीर्णं वस्त्रम् आशादशकम् अचपलं तल्पम् अस्वल्पम् उर्वीम् ।येषां निःसङ्गताङ्गीकरणपरिणतस्वान्तसन्तोषिणस् तेधन्याः संन्यस्तदैन्यव्यतिकरनिकराः कर्म निर्मूलयन्ति ॥ ९९ ॥

3.107

त्रैलोक्याधिपतित्वम् एव विरसं यस्मिन् महाशासनेतल् लब्ध्वासनवस्त्रमानघटने भोगे रतिं मा कृथाः ।भोगः को ऽपि स एक एव परमो नित्योदिता जृम्भनेयत्स्वादाद् विरसा भवन्ति विसयास् त्रैलोक्यराज्यादयः ॥ ९९*१ ॥

3.108

मातर् मेदिनि तात मारुति सखे तेजः सुबन्धो जलभ्रातर् व्योम निबद्ध एष भवताम् अन्त्यः प्रणामाञ्जलिः । युष्मत्सङ्गवशोपजातसुकृतस्फारस्फुरन्निर्मलज्ञानापास्तसमस्तमोहमहिमा लीने परब्रह्मणि ॥ १०० ॥

3.109

शय्या शैलशिलागृहं गिरिगुहा वस्त्रं तरुणां त्वचःसारङ्गाः सुहृदो ननु क्षितिरुहां वृत्तिः फलैः कोमलैः ।येसां निर्झरम् अम्बुपानम् उचितं रत्यै तु विद्याङ्गनामन्ये ते परमेश्वराः शिरसि यरि बद्धो न सेवाञ्जलिः ॥ १००*१ ॥

3.110

धैर्यं यस्य पिता क्षमा च जननी शान्तिश् चिरं गेहिनीसत्यं मित्रम् इदं दया च भगिनी भ्राता मनःसंयमः ।शय्या भूमितलं दिशो ऽपि वसनं ज्ञानामृतं भोजनंह्य् एते यस्य कुटुम्बिनो वद सखे कस्माद् भयं योगिनः ॥ १००*२ ॥

3.111

अहो वा हारे वा बलवति रिपौ वा सुहृदि वामणौ वा लोष्ठे वा कुसुमशयने वा दृषदि वा ।तृणे वा स्त्रैणे वा मम समदृशो यान्ति दिवसाःक्वचित् पुण्यारण्ये शिव शिव शिवेति प्रलपतः ॥ १००*३ ॥